जागदीशी सिद्धान्तलक्षणं

ले. जगदीश

विषय- दर्शन (नव्य-न्याय)

35 पत्र

यद्रूपावछिन्नानुयोगिताकपर्याप्तिकासाध्यतावछेदकता तद्रूपावछिन्नानुयोगिताकपर्याप्तिकायाऽवछेदकता तान्निरूपिता तदन्याऽवछेदकता न्निरूपिता या प्र

टीप. दीं.

१

श्रीमतेरामानुजायनमः वन्हित्वावछिन्नस्यसर्वस्यैवधूमादिमन्निष्ठाभावप्रतियोगितावछेदकीभूततत्तद्व्यक्ति
त्वावछिन्नत्वादव्याप्तिरित्यपियाव्याचष्टे प्रतियोगितानवछेदकोयोधर्मइति नपाचप्रतियोगितावछेदक
इत्यस्यभावप्रधाननिर्देशतयाऽवछिन्नपदस्यावछिन्नप्रतियोगिताकपरतयातादृशप्रतियोगितावछे
दकत्वावछिन्नप्रतियोगिताकभिन्नत्वंलभ्यतइतिनावछिन्नपदवैयर्थ्यमितिध्येयम् यद्यपिपर्वतेम
हानसीयोवन्हिर्नास्तीत्यादिप्रतीतिसिद्धस्यहेतुमन्निष्ठाभावस्यप्रतियोगितावछेदकमेववन्हित्वामि
त्यव्याप्तितादवस्थ्यम् नचैतादृशावछेदकतापर्याप्त्यधिकरणत्वंनवन्हित्वस्येत्यदोषः प्रत्येकमु
भयत्रपर्याप्तिसंबंधेनासत्तोऽवछेदकत्वस्योभयत्रपर्याप्तिसंबंधेनसत्त्वायोगात् तथापिसाध्यता
वछेदकतादितरोभयावछेदभिन्नायाएवप्रतियोगितायाअनवछेदकत्वस्यविवक्षितत्वात् अदोष
इतिध्येयम् नचप्रमेयसाध्यतावछेदकस्थलेतादितराप्रसिद्धिरितिवाच्यम् तदितरपदेनस्वानवछि
न्नप्रकारतावछेदकसाविवक्षितत्वात् साध्यतावछेदकाभिन्नोयःसाध्यनिष्ठोधर्मस्तदनवछेद्या

१३९४

राम

१

नुप्रतियोगितानप्रवेशपातप्यामातितादृशप्रतियोगिताशून्यसाध्यसामानाधिकरण्यस्यैवव्याप्तित्वसंभवेसा
ध्यतावच्छेदकस्यतादृशप्रतियोगितानवच्छेदकत्वानुसरणस्यवैयर्थ्यापत्तेः अपिचप्रतेयवान्वाच्यत्वादि
त्यादावव्याप्तिः तत्पादिसाध्यतावच्छेदकातिरिक्तंयत्साध्यवृत्तिघटत्वादिकंतदनवच्छेद्यप्रतियोगिताकस्यहेतुसमा
नाधिकरणाभावस्याप्रसिद्धिरितिनु नवीनाः इव्यत्वादिरूपेणधूमेवन्हिव्याप्यत्वस्यधूमसामान्येवातत्तद्वन्हित्वा
वच्छिन्नव्याप्यत्वस्यचवारणायविशिष्यलक्षणंनिर्दिशन्ति तद्रूपावीशिष्टसेत्यादिना तद्धर्मावच्छिन्नहेतुकता
दृशधर्मावच्छिन्नविधेयताकानुमितिजनकतायांविषयविधयावच्छेदिकेतितदर्थः तेनव्याप्तिपदेना
पितादृशधर्मसामानाधिकरण्योक्त्यानयोनरूपम् महानसीयवन्हिसामानाधिकरण्यस्यैवानीतविलधूमवन्न्या
दिव्याप्तित्वमिति व्याप्तेस्सामान्यरूपतालाभाय यावदिति येनकेनापीति च ननु दाण्डिमान्दाण्डिसंयोगादित्यत्रा
व्याप्तिश्चालिनीन्यायेनदंडमात्रस्यैवहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वात् नचस्वरूपसाध्यताव
च्छेदकस्यलेप्रतियोगितानवच्छेदकमित्यत्रावच्छेदकत्वंनिरवच्छिन्नमिवाविशिष्टसाध्यतावच्छेदकस्य
लोपियेनरूपेणसाध्यतावच्छेदकत्वंतत्तादितरोभयानवच्छिन्नप्रतियोगितावच्छेदकत्वमेवग्राह्यम्

दण्डिसंयोगा
दित्यत्रदंडा
धिकरणानु
योगिकत्वंवि
शिष्टसंयोगत्वं
हेतुरित्यर्थः ४

1395

अन्यथा पर्वतो महानसीयवह्निरहितत्वविशिष्टजातिमान्नास्तीत्यादिप्रतीत्या विशिष्टवह्नित्वस्य तादृशाभावप्रतियो
गितावच्छेदकतया वह्निमान्धूमादित्यादाविव जातिमत्वान्यटत्वादित्यादावव्याप्तिप्रसंगात् घटे पटसमवेतत्व
विशिष्टजातिमान्नास्तीत्यादिप्रतीत्या विशिष्टजातेस्तादृशप्रतियोगितावच्छेदकत्वात् तथा च तद्दंडवान्नास्ती
त्यादिप्रतीत्यानन्ताविशिष्टदंडव्यक्तेरेव प्रतियोगितावच्छेदकत्वावगाहनात् शुद्धदंडव्यक्तीनां दंडत्वतादितराभ
यानवाच्छिन्नं पक्षेहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वं तदभावसत्वान्नाव्याप्तिरितिवाच्यम् प्र
मेयदंडवान्नास्तीत्यादौ प्रमेयत्वोपलक्षिततस्यैव तद्दंडवान्नास्तीत्यादावपि तत्त्वोपलक्षिततदंडव्यक्तिमा
त्रस्यैवावच्छेदकत्वोपगमात्केवलस्यावच्छेदकत्वासंभव एवाविशिष्टस्य तत्पावत्वीकारादन्यथा प्रमे
यत्वादिविशिष्टदंडादेरपि तथात्वापत्तेरत आह दंडाद्यावृत्तीति हेतुमति दंडसामान्याभावसत्वाद्दंडत्वम
पि तादृशप्रतियोगितावच्छेदकमेवेत्यत उक्तं परंपरासंबन्धमिति तथा च स्वाश्रयाश्रयत्वरूपपरंपरास
बंधेन दंडत्ववतो दंडिनस्साधनवत्समभाववीरहान्नाव्याप्तिः साध्यतावच्छेदकघटकसंबंधावच्छिन्नाया
एव हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतायाः प्रविष्टत्वात् अन्यथाविषयपित पारूपत्वादिमत

अप्रसक्तातिप्रसंग
धनापादकेस्यैवा
वच्छेदकत्वे संभवति
सति गुरौ तदभावात्
अपेक्षितानुपपत्तिः
प्रसंगः अनपेक्षिता
पत्तिरतिप्रसंगः १

1396

वा

स्समवायेनाभावस्यहेतुमतिसत्वाद्रूपवान्पृथिवीत्वादित्यादावव्याप्तिप्रसंगादितिभावः यदिवदंडिमातिशुद्धदंडव्यक्तेरवच्छेद
कत्वावगाहिप्रत्ययांतरासत्वात्तद्दंडीनास्तीतिप्रतीत्यातन्नाविशिष्टदंडव्यक्तेरेवावच्छेदकत्वंयुक्तंदंडीनास्तीतिप्रती
त्यन्यथानुपपत्यादंडस्यैवावच्छेदकत्वसिद्धौप्रमेयदंडवान्नास्तीत्यादेरपितन्मात्रावच्छेदकत्वेनैवसामंजस्ये
विशिष्टस्यतत्रावच्छेदकत्वकल्पनात् तथाचकथमुक्ताव्याप्तिरित्युच्यते तदाहरूपत्वन्यूनवृत्तिजातिमत्वानू
पादित्यादावव्याप्तिस्तदासामेवनीलत्वपीतत्वादीनांरूपत्वन्यूनवृत्तिजातीनांसाधनवन्निष्ठाभावप्रतियोगि
तायानिरवच्छिन्नावच्छेदकत्वाद्रूपवतिनीलोनास्तीतिप्रत्ययादित्याशयेनदंडाद्यादावित्यादिपदमुपात्तम्
तथाचतत्रापित्वन्यूनवृत्तिजात्याश्रयत्वसंबंधेनरूपत्वमेवसाध्यतावच्छेदकमितिभावः साध्यताव
च्छेदकमिति अनुमितिविधेयतावच्छेदकमित्यर्थः तथाचोक्तव्याप्तिज्ञानाद्दंडांशेदंडत्वप्रकारिकादं
डत्ववत्वानित्येवानुमितिःनतुदंडिमानितिदंडप्रकारिकापितस्यव्यापकतावच्छेदकत्वेनाग्रहात्का
रणाबाधेनतदवच्छिन्नविधेयताकानुमित्यसंभवादितिभावः वस्तुतोदंडत्वस्यसाध्यतावच्छेदक

त्वे दंडिमानित्यनुमितिर्नस्याद्दंडानां व्यापकतानवच्छेदकत्वादित्यत्वरसादेव दंडत्वादिकमित्यत्रादिपदमनुपात्तम् तेनत
त्तद्दंडव्यक्तीनामेवस्वरतिदंडत्वाश्रयाधिकरणत्वलक्षणपरंपरासंबंधेन साध्यतावच्छेदकत्वलाभाद्दंडिमानित्यनु
मितेर्नानुपपत्तिलेशोपीति ध्येयम् केचित्तु साध्यसाधनभेदेन व्याप्तिग्रहानुमित्योः कार्यकारणभावभेदाद्य
त्रे दंडत्वादिविशिष्टसाध्यतावच्छेदकं तत्र हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतानवच्छेदको यो धर्मस्तद्वि
शिष्टावच्छिन्नसामानाधिकरण्यरूपैव व्याप्तिस्तद्विशिष्टावच्छिन्नाविधेयताकानुमितिप्रयोजिका यत्र च परंप
रया दंडत्वादिकमेवानुमितौ विधेयतावच्छेदकं तत्र हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदको यो धर्मः परस्पर
यातदवच्छिन्नसामानाधिकरण्यरूपैव व्याप्तिरनुमितिप्रयोजिकेति सामानाधिकरण्यांशे दंडादेः प्रवेशाप्र
वेशाकृतत्वं दंडिमान्दंडत्ववत्वान्नित्यनुमित्योर्दंडादिविषयकत्वानियमस्त्याहुः तत्तु दण्डत्वधार्म्मिक
निरूपितानवच्छेदकत्वसानस्यैव कार्यतावच्छेदकं दंडावच्छिन्नाविधेयताकानुमितित्वस्यापि तादृश
ज्ञानकार्यतावच्छेदकतया सर्वत्रैव दंडिमान्दण्डत्ववत्वान्नित्यनुमित्याकारानुमित्यापत्तेरुभयधर्मावं

मितित्वानिरूपितत्वे दंडप्रकारकत्वं नानुपपन्न

ति १ नु १

च्छिन्नस्य सामग्रीसद्भावादिति दिक् । नव्यास्तु दंडिमानित्याद्यनुमितौ संयोगेन दंडादेः प्रकारत्वं न किंतु स्ववृत्तिपुरुषत्वावच्छिन्ना
धिकरणत्वसंबंधेन नचैवमनुभवापलापापत्ति दीधितिकृन्मतेपि दंडस्य साध्यतावच्छेदकधर्मविधया संयोगस्य च साध्य
तावच्छेदकताघटकसंसर्गविधयावगाहित्वापलापापत्तेरिति प्राहुः यद्रूप विशिष्टेत्यस्य फलमाह इत्थंचेति चोवधार
णे इत्यादावित्यादिन्यायस्य स्थलीयहेतौ तथाच न्यायः पदानिर्देशं विना नोत्पन्न इदंपदेन तन्निर्देशः यत्तु द्रव्ये धर्मिणि
[illegible] तादात्म्येन गुणकर्मणोः साध्यताभ्रमं निरसितुमिदमितिपदानिर्देश इति तन्मंदम् एवमपि इ
दंत्वविशिष्टद्रव्ये गुणकर्मणोस्साध्यताभ्रमस्यानिरासादिति गुणादाववृत्तेरिति गुणादावभावादित्यर्थः तथाच हे
तुतावच्छेदकावच्छिन्नाधिकरणत्वं न गुणस्येति भावः यद्यप्यवश्यक्लृप्ताभिः पर्वतत्वच ज्वरत्वादितत्तद्धर्मविशि
ष्टधूमत्वाद्यवच्छिन्नाधिकरणताव्यक्तिभिरेव धूमवानिति प्रतीत्युपपत्तौ धूमत्वाद्यवच्छिन्नाधिकरणत्वे मानाभावा
द्वह्निमान्धूमादित्यादावव्याप्तिः हेतुतावच्छेदकीभूतधूमत्वाद्यवच्छिन्नाधिकरणत्वाप्रसिद्धेः तथापि हेतुतावच्छेदक
धर्मत्वाश्रयाधिकरणीभूतयावन्निष्ठाधिकरणतानवच्छेदकत्वस्य च तयोर्व्यतिरेकः तथावि

ध्यं हेतुतावच्छेदकाश्रयाधिकरणमेव हेतुतावच्छेदकावच्छिन्नाधिकरणोत्पन्नेनापि वाच्यमिति तन्न वह्निमान् धूमादित्यादौ च तादृ
शहेत्वधिकरणं धूमाधिकरणमात्रम् द्रव्यं विशिष्टसत्त्वादित्यादौ च तादृशहेत्वधिकरणं द्रव्यमेव न तु गुणादिरिति वि
शिष्टसत्तात्वे तन्निष्ठाधिकरणतानवच्छेदकत्वस्याधिकरणतावच्छेदकत्वस्य च द्वयोस्सत्त्वादिति ध्येयम् साधनभे
देन व्याप्तेर्भेद इत्यत्र साधनतावच्छेदकेनाधिकरणतावच्छेदकं तत्तदाश्रयसामानाधिकरण्यमेव निवेश्यमित्यपि व
देति नतु सामानाधिकरण्यस्य व्याप्तित्वेन तस्य प्रतिधूमं भिन्नत्वाद्धूमसामान्ये वह्निसामान्यस्यैका व्याप्तिरिति व्यवहारोनु
पपन्न इत्यत आह सामानाधिकरण्ये ति तथा च वह्नित्वधूमत्वाद्यनुगमादेवात्र व्याप्तेरैक्यव्यवहारो न तु वस्तु
गत्या व्याप्तेरैक्यमिति भावः नन्वेवं महानसीयवह्निसामानाधिकरण्यस्यैव तत्पर्वतवृत्तिधूमादावसत्त्वात्पर्वती
यवह्निसामानाधिकरण्यस्य च प्रागननुभवात्कुतः परामर्श इत्याशंकायामेकैव हि सा व्याप्तिरिति परामर्शोपि सि
द्धांतग्रंथोऽसंगत इत्यत आह वस्तुतस्त्विति रासभादीति तथा च धूमव्यापकवह्निसमानाधिकरणतासमवान्यव
त इति ज्ञानादप्यनुमितिः स्यादिति भावः नच धूमादिव्यापकवह्न्यादिसमानाधिकरणधूमादिमत्तानिश्चयप
त्वेनैव परामर्शस्य धूमादिलिंगकानुमितिहेतुत्वादुक्तव्याप्ते रासभादिसाधारण्येपि न क्षतिरिति वाच्यं

पक्षधर्मांशे विषयतयानुमितिजनकतावच्छेदकस्यैव व्याप्तिपक्षधर्मतया धूमत्वादेस्तत्रानिवेशेन तद्घटितस्यैव व्याप्तित्वादि
तिभावः धूमत्वादीति तथा च तस्योतिप्रसक्तस्यं तत्पदं लक्ष्ये लक्षणे चोभयत्रान्वितमिति भावः ननु साधनानिष्ठसामानाधि
करण्यस्य व्याप्तित्वे ऽयोऽयमेकैव वह्निसाव्याप्तिरिति ग्रंथानुपपत्तिस्तदवस्थैव किंच विशिष्टसत्त्वव्यापकीभूतद्रव्यत्वसामा
नाधिकरण्यवतः सत्त्वस्य गुणादौ परामर्शात् कुतोऽपि द्रव्यत्वानुमितिः प्रमा स्यादत आह तद्वतीति तादृशसामानाधिक
रण्यवतीत्यर्थः तथा च तादृशसामानाधिकरण्यविशिष्टधूमत्वं व्याप्तिस्तत्प्रकारिकैव पक्षधर्मताधीरनुमितिहे
तुः तत्र नीलघटत्वप्रकारकबुद्धौ घटत्वस्येव स्वरूपतएव धूमत्वस्य भानं न तु धूमत्वत्वेनेति प्रतीयते गौरवमिति
भावः आद्येति तथा च तामुपादाय पर्वतीयवह्निधूमयोः सान्निकर्षात्तयोः कथं व्याप्तिग्रहः इति परामर्शीयः धू
ताट र्वपक्ष इति भावः द्वितीयेति तथा चैवमभिप्रेत्यैवैकैव वह्निसाव्याप्तिरिति परामर्शीयान्तःग्रंथ इति भावः प्रत्येकमे
व साध्याधिकरणंतत्रैतद्रूपवानेतद्रसादित्यादावाद्याप्याभिन्नैव पक्षत्वद्रव्यत्वादौ साध्ये रूपत्वव्याप्यजातिम
तो हेतुत्वं तत्र हेतुतावच्छेदकीभूतानां नीलत्वादिजातीनां नानात्वेन द्वितीयापि क्वाचिद्भिन्नैवेति मंतव्यम् कोचि
त्तु आद्याभिन्नाऽनुमितेर्विषयविधया जनकतावच्छेदकाभिन्नाकिंतु व्यवहारोपयिकीति द्वितीया त्वभिन्ना विष
य[illegible]तयानुमितिजनकतावच्छेदकरूपाद्भिन्नैवेत्याहुः कापि संयोगीन्येत तत्पदार्थस्य साध्यताभ्रमवारणार्थमप

क

प्रि॰
जा॰ग॰
५

पत्र

मितीति निर्देशः सांप्रदायिकमते संयोगसामान्याभावस्य द्रव्येऽभावात्कपीति रत्नमात्रे कपिसंयोगाभावादेतदिति न
चाभावे हेतुसामानाधिकरण्यस्यैव हेत्वधिकरणेतिरवाच्छिन्नवृत्तिकत्वरूपस्यानिवेशादुक्ताव्याप्तिव्युदाससंभवा
त्प्रतियोगिवैयधिकरण्यविशेषणप्रवेशो न्यूनस्मा मन्नुवित इति वाच्यम् अग्रे समाधास्यमानत्वादिति भा
वः ननु असमानाधिकरणांतम् ननु शाखावमूलावि सर्वावयवावच्छेदेन सर्वद्रव्यगगनादिसंयोगस्य सत्त्वा
त्कुतस्तत्सामान्याभावस्य द्रव्ये संभव इत्यत आह संयोगस्येति वृत्तत्वेति शाखावच्छेदेन तत्संयोगसत्त्वेपि वृ
क्षत्वावच्छेदेन कस्यापि द्रव्यसंयोगव्यक्तेरसत्त्वात्तदवच्छेदेनैव संयोगसामान्याभावसंभवोऽवच्छेदकभेदे
नैकत्र भावाभावयोस्समावेशादितिभावः नन्वेवं वृक्षे संयोगसामान्याभावस्य कुतो नाध्यक्षमत आह
तत्वचेति तत्र संयोगसामान्याभावे सत्त्वादिरूपस्य प्रतियोगितासंबंधेनेत्यादिः तथा च संयोगसामान्या
भावस्यायोग्यप्रतियोगिकत्वान्नाध्यक्षत्वमितिभावः ननु प्रतियोगितावच्छेदकविशिष्टस्यैव यस्य कस्य प्रतियोगि
नो योग्यत्वमभावप्रत्यक्षे तंत्रं ननु योग्यमात्रप्रतियोगिकत्वम् अन्यथा गुणेऽपि संयोगसामान्याभावस्य तादृश
प्रत्यक्षं न स्यादत आह पर्यंतसति परितः सर्वावयवावच्छेदेन प्रतियोगिग्रहात्मकाद्दोषाद्वेत्यर्थः नचैवमपि प्रति

1402

राम
५

वस्तुतस्तु प्रतियोगिताव च्छेदकयद्धर्मसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकयावदभाववान्सतद्धर्मावच्छिन्नाभाववानित्येवव्याप्तिः तेन
घ्राणग्राह्यत्वादौ शीघ्र गुणत्वस्यगुणत्वानतिरेकितयाजातित्वेपिनक्षतिः

यो

योगिनो ग्रहोत्पत्तिवशाद्याभेवतत्त्वसत्त्वंदुर्वारमितिवाच्यम् प्रतियोग्युपलंभकसामग्र्या अपिदोषत्वोपगमात्प्रतियोगीनउ
पस्तात्धिर्यतइतिव्युत्पत्त्या तस्याएववाप्रस्तुतत्वादितिभावः प्रतियोग्युपलभरूपदोषाभावस्यसंयोगसामान्याभावप्रत्यक्षे
कार्य्यसहभावेनहेतुत्वोपगमान्नदोषइत्याहुः नवेति मानमितिपरेणान्वयः योपदीयेति योपजातिसमानाधिकरणो
भयावृत्तिधर्मावच्छिन्नपक्षेवं यावच्छिन्नप्रतियोगिताकयावदभाववान्सतज्जात्यवच्छिन्नतत्संबधावच्छिन्नप्रति
योगिताकाभाववानित्यर्थः तेननस्वरूपासिद्धिस्तिद्धसाधनंवा नात्युपादानाद्गुरुधर्मस्यप्रतियोगितानवच्छेदकत्वे
तदवच्छिन्नाभावाप्रसिद्ध्यापिनव्यभिचारः नचसत्त्वगुणत्वाद्यवच्छिन्नाभावमादाय स्वरूपासिद्धेर्वारकस्योभयावृत्ति
पदस्यवैय्यर्थ्यं व्यभिचारवारकस्यैवासिद्धिवारकस्यापि विशेषणस्यसार्थकतायाःपक्षधरमिश्रादिसंमतत्वात् अ
तएवानित्यत्वसाध्यकानुमानेविशेषगुणांतरासमानाधिकरणैकमात्रवृत्तिगुणत्वहेतौ शब्देतरार्थकस्यांतर
पदस्यतैः सार्थकत्वंसमर्थितम् यद्वा योपदीयपावद्विशेषाभाववानित्यस्ययोपदीयानांयद्धर्मावच्छिन्न
प्रतियोगित्वानांयावतांविशेषाभाववान्प्रत्येकावच्छिन्नाभाववान्सतद्धर्मावच्छिन्नाभाववानित्यर्थः तथाचसंयोगत्वा
वच्छिन्नप्रतियोगिताव्यक्तीनांप्रत्येकावच्छिन्नाभावकूटवत्त्वस्यपक्षेसत्त्वान्नासिद्धिः नवाव्यर्थविशेषणत्वमिति
ध्येयम् योयद्धर्मन्यूनवृत्तिधर्मावच्छिन्नयावदभाववान्सतद्धर्मावच्छिन्नाभाववानित्यर्थस्तु संयोगत्वन्यूनव

यद्धर्मन्यूनवृत्तित्वं यद्धर्मसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वेसतियद्धर्मसमानाधिकरणत्वम् १

1403

जा॰ती॰
६

यादिसामान्याधिकरणसंबंधेनक पिप्रतियोगिकत्वस्यसंयोगत्वे ऽन्वयस्तसामानिरवच्छिन्नत्वं वृत्ता तंजातीनिरावच्छेदकतान्निरवच्छिन्नस्मृतं

गोत्वावच्छिन्नत्वं च तत्रैवावच्छिन्नतज्जातीनिरावच्छेदकतानिरूपकत्वे सति ६
निरवच्छिन्नतज्जातीनिरावच्छेदकतानिरूपकत्वम् ८

तिधर्मावच्छिन्नप्रतियोगिताकस्य घटवृत्तिसंयोगत्वरूपावच्छेदकसमनियततत्वाद्यवच्छिन्नाभावस्य यावदन्तर्गतत्वस्य
वृत्तादौ पक्षे स्वरूपासिद्धत्वादनुपादेयः संयोगपावाद्विशेषाभावइति न च समवायावच्छेदेन वृत्त्यादौ गग
नादेरेकएव संयोगोऽत्राघटादिति तस्यैवाभाववृत्तिरहात्संयोगपावाद्विशेषाभाववत्वं पक्षे स्वरूपासिद्धमितिवा
च्यम् अतिप्रसंगभंगायवृत्तिरदौ तन्तद्व्यवसायावच्छिन्नवृत्तिकसंयोगंप्रतितत्तद्व्यवच्छेनहेतुत्वस्यावश्यकत
यावृत्तेर्व्याप्यवृत्तिगगनसंयोगस्याभावादितिभावः प्राचांमतेयत्तदर्पपरेण्नुगतमाह एकावच्छेदेनेति इदं
मुपाधेः साधनाव्यापकत्वरक्षायै न चैवंतत्तत्संयोगाभावस्यगुणेऽव्याप्यवृत्तित्वादेकावच्छिन्नत्वेनसाध्य
व्यापकत्वं दुर्घटमितिवाच्यम् एकावच्छेदेनेत्यनेनानवच्छिन्नवृत्तिकत्वादिविशिष्टस्यस्याविवक्षितत्वात्॥
न च तत्पायिकापिसंयोगस्यान्याभाववृत्तिरत्तौ निरवच्छिन्नवृत्तिकत्वाविशिष्टस्यतद्दीपयावद्विशेषाभावस्य
सत्वादुपाधेस्साध्याव्यापकत्वमितिवाच्यम् गोत्वस्यावच्छिन्नाभावस्येवोक्तव्यातौसाध्याविधयाप्रवेशात्कापिसं
योगाभावस्यचातन्यात्वेनतंप्रतितद्दीपयावद्विशेषाभावस्योक्तरूपेणाव्यापकत्वोपित्तत्स्वभावात् नचाभिधा
तादिसामान्याभावस्यवृत्तेस्सत्वात्तत्रच निरवच्छिन्नवृत्तिकत्वादिविशिष्टस्यतद्दीपयावद्विशेषाभावस्यासत्वा
देवोपाधेः साध्याव्यापकत्वमेवेतिवाच्यम् गुणादिभाजकमात्रेरेवहेतुसाध्ययोः प्रवेशात् केचित्तु एकाव

धीविशेषविषयत्वं पर्यंतत्वम् ५

कपिसंयोगत्वकारि प्रतियोगिकत्वविशिष्ट संयोगत्वं ८

१४.०४

राम
६

रूपसामान्याभाववान् रूपविशेषाभाववत्त्वात् इत्यापि एकावच्छेदेन रूपवि-
शेषाभावउपाधिः ४

च्छेदेनेत्यस्यावच्छेदकतासंबंधेन तदभावाधिकरणीभूतदेशस्यावच्छेदकतासंबंधेनाभाववत्त्वेनेत्यर्थः तथा
च तादृशरूपादिविशेषाभाववत्त्वमुपाधिरित्याहुस्तच्चिंत्यं चिंतावीजं तु तादृशदेशस्यावच्छेदकतासंबंधेनाभावो
नाव्याप्यवृत्तिर्भिन्नाभावादतो तादृशरूपादिविशेषाभावरूपोपाध्यप्रसिद्धिरिदमपि ध्येयं पक्षत्वेकावच्छेदेनेत्यस्य परस्परानवच्छेदकानवच्छिन्नवृत्तिकत्वविशिष्टेत्यर्थमाहुस्तन्नव्याप्यवृत्तिरूपादीनां विशेषाभावस्यावच्छेदकाप्रसिद्ध्या तदनवच्छेदकस्याप्यसंभवेन तत्रैव साध्यव्यापकत्वताद वस्थ्यादिति भावः पक्ष द्वयं विना
कृतमनुगतानुमानमाशंक्य निषेधति एतेनेति व इत्यमाणदोषेणेत्यर्थः व्यर्थेति संयोगसामान्याभावस्यत्व
न्मते केवलान्वयितया तत्साध्यता या मभाववत्त्वादित्यस्यैव सम्यक्त्वादिति भावः अप्यात्त्वभाववत्त्वादिक
मेव हेतुरत आह अप्रयोजकत्वादिति अनुकूलतर्करहितत्वादित्यर्थः ननु निरुपाधित्वमेवाप्रयोजकमत आह निर्गुणत्वादिति आदिना द्रव्यभिन्नत्वादेरुपग्रहः अत्रपद्यपि निर्गुणत्वोपाधेर्न साभावेन साध्या
भावोन्नायकतया दोषत्वं संयोगस्येव साध्याभावत्तया वृत्तित्तस्य वृत्त्वात् नापि व्यभिचारोन्नायकतया तत दो
एवत्त्या पिस्वव्याप्यत्वे न साध्यस्य पक्षवृत्तित्वाभावोन्नायकतया दूषकत्वं वो ध्यम संयोगसामान्याभावो
न वृत्तवृत्ति निर्गुणत्वादिव्याप्यत्वादित्यनुमानेनापि वृत्तः संयोगसामान्याभावानित्यनुमितेः प्रतिरोधादि

अवच्छेदकतासंबं
धस्य वृत्यनियाम
कत्वातर

उपहितानुपहितयोरवच्छेदावच्छेदकभावहीकारान ५

तिध्येयम् ननु योयद्धर्मस्यानवच्छेदकः स तदभावानवच्छेदक इति व्याप्ये वह्नित्वादेः संयोगसामान्याभावावच्छेदक
त्वे सेत्स्यतीत्याशंक्य निराचष्टे न चेति तथा च व्यभिचारान्नोक्तव्याप्तिरिति भावः ननु वह्नित्वं संयोगसामान्याभावाव
च्छेदकं संयोगसामान्यानवच्छेदकत्वादिति विशिष्टव्याप्तिर्वा व्याप्यप्रमेयत्ववत्त्वादेः पर्वतसमत्वादतः त्वहव्या
प्तिस्फिमाह यथाचेति प्रतिदंडाभीति भिन्नत्वेषीति परेणान्वयः नन्वव्यवहितपूर्वक्षणवृत्तितायाः अवच्छेदकं नदंड
त्वमतिप्रसंगात् किंत्वव्यवहितपूर्ववृत्तित्वाभावत्वावच्छेदकताः सा चाभिन्ने त्यतः संयोगस्य तत्र एवानुहृ पंदह्रांतमा
ह यन्नीति न तत्सामान्याभावेति यत्र पूर्ववृत्तित्वसामान्यस्य नान्वेसामानाधिकरण्यसामान्यस्य वेत्यर्थः केचित्तुक
त्पीतन्याभावप्रयोजकत्वमन्यथा तदभावानवच्छेदकान्यदेहुनानदंडवच्छेदकत्वमेव कुतोनवह्नित्वादेः साध्य
ते वह्नित्वावच्छेदेन न संयोगव्यक्तीनामसत्त्वेपि संयोगसामान्यस्य संभवादित्यभिप्रायकोयं ग्रंथ इत्याहुः उत्प
त्स्येति सामान्याभावइति परेणान्वयः नन्वाद्यत्त्वेघटे गुणोनास्तीति प्रत्यक्ष मर्त्ससंभवादिसंतान्तिकर्षाद्यभावात् प्र
थमक्षणे घटादौ गुणोनास्तीत्यादि व्यवहारादेकं चक्षं दिग्धसामान्यकनतः स्यानांतरमाह प्रलयापवच्छेदेनेति तदानींन
न्यभावसत्त्वे प्रलयएवव्याहन्येतेति भावः ननु न हि प्रलये नानाभावानन्तदवच्छेदेनेत्ययुक्तमत आह तथेति ननूक्तप्रती
तिः पर्वतेन वह्निरिति हुताशनावच्छेदकत्वाभावे रोरवे शैत्यरावच्छिन्नपर्वतेन वह्नित्वाभावं वा हुताशनेऽवगाहते ननु

त

1407

प

पर्वतएव हुताशनाभाववानित्यादिकं यत्तदाप्याह वृत्तेरिति वृत्तेः संबंधस्य वृत्तिमतः संबंधवतः तथा च यो यदवच्छे
देन यदीयत्संबंधाभाववान् स तदवच्छेदेन तस्य तत्संबंधावच्छिन्नाभाववानिति व्याख्यायांऽपि शिखरावच्छेदेन संयोगसं
बंधावच्छिन्नवह्न्यभावसिद्धिरिति भावः ननु उक्तव्याप्यत्वप्रयोजकत्वमन्यथापि तुल्यन्यायेन यो यदीयपत्संबन्धवान् स तत्
त्संबन्धेन तद्वानिति व्याख्यायामपि कुंडादिसंयोगिनो बदरादेः संयोगेन कुंडादिमत्त्वापत्तेरित्युक्तावाह एवमिति भेदो विशेषः
यथा घटवत्यपि काले इदानीं तंतौ न घट इति प्रतीत्या तंत्ववच्छेदेनैतत्काले घटाभाववत्त्वात् घटवत्यपि कपाले घटनाश
दशायामिदानीमिह कपाले न घट इत्यनुभवादेतत्कालावच्छेदेन कपाले घटस्य [illegible] सामान्याभावः
सिद्ध इति न चेदानीं तंतुषु न घट इत्यादिप्रतीतेरेतत्कालावच्छिन्नतंतुष्वेव घटाभावो विषयो न तु तंत्ववच्छेदेनैतत्काले
तथेति वाच्यम् तंतुषु घटाभावस्याव्याप्यवृत्तित्वेन तत्कालस्य तदवच्छेदकत्वावगाहने उक्तप्रतीतेर्भ्रमत्वापातात्
न च तथाप्येतत्कालवृत्तिघटस्याभाव एव तंतुषु भासतां तत्रेति वाच्यम् कालस्य प्रतियोगिकृत्त्वावग्रहेऽपि तादृशप्र
तीतेस्तंत्ववच्छेदेन समये घटाभावावगाहित्वस्यानुभविकत्वादिति भावः तथापीति गुणवत्संयोगवद्घ

इव्यत्वाद्यवच्छिन्नमात्रसमवायेऽपरत्वानेतत्कालनत्वात्कपालं घटवत् ध्वंसादित्यादावव्याप्तिवारणायेत्यर्थः तादिति अ
समानाधिकरणं न दलामित्यर्थः नोपादेयमिति येन रूपेण येन संबंधेन व्याप्यवृत्तितेन रूपेण तेन संबंधेन तस्य सा
ध्यतायां नोपादेयमित्यर्थः तेन द्रव्ये संयोगत्वेनाव्याप्यवृत्तेरपि संयोगस्य समवेतत्वेन साध्यतायां कालिकतयाऽव्या
प्यवृत्तेरपि द्रव्यत्वस्य समवायेन साध्यतायां चैन प्रतियोगिव्यधिकरणमिति परंतु समवायेन व्याप्यवृत्तेरपि द्रव्य
त्वाऽऽत्मत्वादेः कालिकेन साध्यतायां तदुपादेयमेव अव्याप्यवृत्तिसाध्यके संयोगाभाववान् गुणत्वादित्यादौ
ऽव्याप्तिदेयनदेयं व्याप्यवृत्तिसाध्यकेतु प्रयोजनाविरहात् सर्वत्र न देयमित्यावेदयितुं सर्वत्रेत्युक्तं साध्यभेदेने
ति साधनाघटकसंबंधाद्धेतुरस्तु पञ्चलक्षणं यद्यपि व्याप्यवृत्तिसाध्यकस्थले तदप्रवेशे सत्ता न जातेरित्यादाव
व्याप्तिस्तापनवतिसंवादाद्दि समवायेन सत्ताभावस्यापि कालिकादिसंबंधेन वृत्तेः नचाभावे हेत्वधिकरण
वृत्तित्वस्य विशेषणतया विवक्षणान्नोक्तदोष इत्यपात् तथापि द्रव्यत्वशून्यसत्त्वादित्यत्रातिव्याप्तेर्द्रव्यत्व
त्वरूपसाध्याभावस्यापि शोषणतया वृत्तित्वादिरहाद्व्याप्तिर्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्यापि द्रव्य
त्वरूपसाध्याभावस्यातिरिक्तनयोक्तातिव्याप्तिवारणमिति वाच्यम्
त्वानतिरिक्तत्वात् नचाभावत्वप्रतीतेः अभावत्वस्तोपमिभावस्यातिरिक्तनयोक्तातिव्याप्तिवारणमिति वाच्यम्

अभावत्वं वेत्याद्रिमग्रंथेन भावाभावसाधारणस्याभावत्वस्यानिर्वचनाद्विरोधापत्तेः घटत्वाद्यभावस्य कालिकादिसं
बंधावच्छिन्नाभावत्वरूपादिसंबंधेन साध्ये गगनत्वादिहेतावव्याप्तेस्तथाप्यनुद्धाराच्च विशेषणतया गगननिरूस्य
घटत्वाभावस्यैव तादृशघटत्वाभावाभावाभावत्वकल्पनात्तावतैवाभावत्वप्रतीतेः प्रमात्वसंभवात् अतएवसा
ध्यताघटकसंबंधेन साध्यवत्त्वबुद्धेर्विषयविधया प्रतिबंधकतावच्छेदकीभूतः संबंधस्तेन संबंधेन हेतुसमानाधि
करणस्याभावस्य आसामित्युक्तावपि न निस्तारः तथाविधसंबंधेन हेतुसामानाधिकरण्याप्रसिद्ध्या प्रागुक्तगगनत्वा
दिहेतौ द्रव्यत्वाभाववज्जातित्वादित्यादौ चाव्याप्तेः तथापि साध्यतावच्छेदकसंबंधेन प्रतियोगिमत्त्वबुद्धेर्विषय
तया प्रतिबंधकतावच्छेदको यः संबंधस्तेन संबंधेन हेत्वधिकरणवृत्तित्वमभावस्यापि विवक्षितमित्यपि दोषः तथाच
द्रव्यत्वाभाववज्जातित्वादित्यादौ विशेषणताविशेषणानातित्वाभाववत्त्वबुद्धेर्विषयविधया प्रतिबंधकताव
च्छेदको यः स्वरूपसंबंधस्तेन जातित्वरूपाभावस्याप्रसिद्धेरिति भावः वस्तुं व्याप्यवृत्तित्वमत्र साध्यतावच्छेदकसंबंधेन
यत्त्वाधिकरणांतर्भूतस्य भावस्य तादृशसंबंधावच्छिन्नप्रतियोगित्वाभावरूपं ग्रंथकृतोऽभिप्रेतं तादृशसाध्यकं च
समवायादिनाऽऽत्मत्वादेः साध्यत्वे ज्ञानवत्त्वादिकं समवायेनाऽऽत्मत्ववृत्ति समवायावच्छिन्नात्मत्वाभावस्य

यात्किंचित्प्रतियोगि
लाश्रय २

यद्यपि इह पर्वते नितंवे हुताशो नाशीत्वेरित्यादिप्रतीत्या वह्निसामान्याभावोपीकेचित्पर्वते महानसीयव
ह्निरूपप्रतियोगिव्यधिकरणो भवति तथापि एकधर्मावच्छिन्ना प्रतियोगिता एकत्र उपहिता प्रतियोग्यव
च्छेदकावच्छेदकभावः वह्न्यभावप्रति

केनापि संबंधेनावृत्तेस्तथा च तादृशसाध्यकत्वे नोपादेयं सत्तावान् जातेरित्यादौ उन्नेयपादेयमेव समवायेन सत्त्ववति स्पंदादौ
समवायावच्छिन्नसत्ताया अभावस्यापि कालिकादिसंबंधेन वर्तमानतया सत्त्वादेर्निरुक्तव्याप्यवृत्तित्वाभावात् व्याप्यवृ
त्तिता घटकस्य स्वत्वाधिकरणवृत्तित्वस्य संबंधसामान्येन प्रविष्टत्वादेतत्सर्वाभार्थमेव सर्वथैव व्याप्यवृत्तीत्युक्तं त
स्य संबंधविशेषानियंत्रित्वात् व्यभिचारादिस्तु संबंधेन वृत्तिनियामकत्वेनाभिमतत्वादेरपि व्याप्यवृत्तित्वहानिरिति ध्येयं
सर्वथैव व्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्यघटितव्याप्तिविशिष्टहेतुमत्तानिश्चयोत्तरानुमितौ नोपादेयं
प्रतियोग्यसमानाधिकरणत्वं तन्मात्रकनात्रावच्छेदककोटौ नोपादेयं साध्यसाधनभेदेन कार्यकारणभेदेन व्या
प्तेः कारणतावच्छेदकव्याप्तेः भेदाभिन्नत्वादित्यपि वदंति एकधर्मावच्छिन्नप्रतियोगितायाः प्रतियोगिव्यक्तीनां
भेदेपि ऐक्यमिति नव्यमतेन वह्निमान्धूमादित्यादौ वह्न्यादिसामान्याभावमादाय व्याप्त्यसंभवादति व्याप्तिवारणप्र
योजनमाह तेनेति नव्य विशिष्टसत्त्वस्य व्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्यप्रवेशाद् इदमयुक्तमिति वा
च्यम् जातौ विशिष्टसत्त्वव्यभिचारज्ञानदशायामपि विशिष्टसत्त्वधर्मिकज्ञाततिमान्निष्ठप्रतियोगिव्यधिकरणाभावप्रति
योगित्वज्ञानात् विशिष्टसत्त्वसाध्यकानुमित्यापत्तिप्रसंगस्यैव प्रकृतेति प्रसंगपदार्थत्वात् विशिष्टसत्त्वस्याप्युक्तरीत्या

त

न

1410

१४११

अत्र व्याप्यवृत्तिसाध्यकस्थलीयलक्षणस्य व्याप्यवृत्तिसाध्यके सत्ता वा जातेरित्यादौ व्याप्त्यभिधानाय प्रतियोगिव्यधिकरणहेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकसाध्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरेवं च उभयपरिष्कारयोरपि विशिष्टसत्ता वा जातेरित्यत्र नातिव्याप्तिरतो न तत्त्वेति

व्याप्यवृत्तित्वविरहाच्च विशिष्टसत्तातिरिक्तत्वमतेन जातित्वाप्रसंभवादाह ॥ नत्वेति प्रांचस्तु विशिष्टसत्वस्य व्याप्यवृ
त्तितया तत्साध्यके प्रतियोगिवैय्यधिकरण्याप्रवेशादुक्तत्वेत्यादि साध्यांतरं तत्र च ॥ तत्त्वमात्मान्यत्वे सति विशेषगु
णवत्त्वं ॥ तत्त्वमवच्छिन्नपरिमाणवत्वं तदुभयं वा व्याप्यवृत्त्येव घटादावुत्पत्तिकालावच्छेदेनैतदुभयाभावसत्त्वादि
त्याहुः नचेति वाच्यमित्यन्वयि तदभावः ॥ तत्त्वम् ॥ तत्त्वोभयाभावः सहजतत इति प्रतियोगितावच्छेदकावच्छिन्न
त्वाप्रवेशेपीत्यर्थः ननूभयत्वस्याविशिष्टत्वातिरिक्तत्वेपि सहजतः प्रतियोगिव्यधिकरणस्याविशिष्टत्वावच्छिन्नाभाव
स्य प्रतियोगितावच्छेदकमेवोभयत्वमतो नातिव्याप्तिः विशिष्टत्वावच्छिन्नाभावस्योभयत्वावच्छिन्नाभावानतिरेकाद
त आह नवेति तदवच्छिन्नाभावः उभयत्वावच्छिन्नाभावः तदवच्छिन्नाभावात् वैशिष्ट्यावच्छिन्नाभावात् लिं
गव्यत्ययेनान्वयः इत्यनुषज्यते तथा चातिरिक्त एवेति भावः नचान्यत्रोभयाभावस्य विशिष्टाभावातिरिक्तत्वे
पि प्रकृते ॥ तत्वाविशिष्ट ॥ तत्त्वाभावस्यैव तदुभयत्वावच्छिन्नप्रतियोगिताकत्वं समानियताभावयोरैक्यादैकत्वा
दिति वाच्यम् तावतापि हेतुमतो यादृशप्रतियोगिताश्रयानधिकरणत्वं तादृशप्रतियोगितानवच्छेदकत्वस्य ॥ तत्व

ता वा जातेरित्यत्र नातिव्याप्तिरतो न तत्त्वेति

1412

मूर्तत्वोभयत्वेऽनयापादितव्याप्तितादवस्थ्यादिति भावः उभयत्वस्येति प्रत्यक्षासिद्धत्वादिति परेणान्वयः तथा चाविरुद्ध
योरिव समानाधिकरणयोरप्युभयत्वमतिरिक्तमेव विरुद्धाविरुद्धस्थलीयोभयत्वप्रतीत्योः समानाकारत्वात् मूर्तत्वमू
र्तत्वयोर्विरुद्धत्वभ्रमदशायामप्युभयत्वस्य प्रत्यक्षत्वाच्चेति भावः नचेति वाच्यमितिपरेणान्वितम् तत्र मूर्तत्वमूर्तत्वो
भयवानित्यत्र व्याप्तिरेवेति तथा च तस्य लक्ष्यतया न कारणप्रयासोऽनुपादेय इति भावः तथात्वेपीति उभयत्वाश्रयस्य
मूर्तत्वस्य मनस्यसत्त्वेपीत्यर्थः तथा च हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणावच्छेदेन साध्यतावच्छेदकावच्छिन्नव
नाप्यसत्त्वाद्व्याप्तिरसौ न लक्षणमिति भावः वृत्तिमतीत्यादिभावस्य व्यभिचारानियतत्वात् व्यभिचारं ग्राहयति ने
ति अत्र वमूर्तत्वाश्रयमनसि ननु वह्न्यादिभेदमादाय व्याप्तिः प्रतियोग्यसामानाधिकरणपदेनैव वारणाद
त्यन्तपदं व्यर्थमत आह अत्यन्तपदं चेति अत्यन्ताभावत्वनिरूपकं यत्प्रतियोगित्वं तदाश्रयवैय्यधिकरण्यवि
वक्षायाः फलमाह अन्यथेति तद्भेदस्य त्वसमानाधिकरणात्यन्ताभावान्तरभेदस्य स्वत्वरूपातिरिक्ततयेत्यस्य
अनवस्थाभयेनेत्यादेः दुर्लभत्वापत्तेरिति हेतुसमानाधिकरणाभावमात्रस्यैव स्वात्मकभेदप्रतियोगिपदभा
वान्तरं तत्समानाधिकरणत्वादिति भावः अग्रेविवक्षणीयस्य साध्यतावच्छेदकसंबंधेन प्रतियोग्यसामाना

नै

न

तम
१·

धि[illegible]रणएपत्त्ववान्हिमान्धूमादित्यादौघटाद्यभावेसत्त्वान्नसर्वत्राप्रसिद्धिः किंतु स्वरूपसंबंधेनसाध्यतायामेवेतिसूच
यितुमप्रसिद्धिमपहाय दुर्लभत्वमुक्तं अत्यंताभावत्वानिरूपकप्रतियोगितानवच्छेदकत्वविवक्षायाः फलमाह
सर्वेषामिति भावभेदस्यातिरिक्तत्वास्वीकारादाह अभावसाध्यकेति तथा च घटभिन्नं पटत्वादित्यादौ पटत्वसमानाधि
करणनिरुक्तप्रतियोगिव्यधिकरणगोत्वाद्यभावस्य घटभेदाभिन्नत्वात्तादृशभेदस्य च गोत्वाभावरूपं तत्प्रतियोगि
तावच्छेदकमेवभेदत्वमित्यव्याप्तिरितिभावः संभवायेत्यस्य स्वरसत्त्व होनं तूक्त विवक्षायामपिसर्वेषांहेतुसमानाधि
करणात्यंताभावानामत्यंताभावत्वानिरूपकेण पूर्वक्षणादिवृत्तित्वविशिष्टत्वाभावात्मकेन प्रतियोगिनासं
मंसामानाधिकरण्याद्भावसाध्यकाव्याप्तितादवस्थ्यं यादृशप्रतियोगिताविशिष्टस्यानाधिकरणं हेत्वधिकरणं
तादृशप्रतियोगितानवच्छेदकत्वप्रवेशेतुव्यर्थमेवात्यंतपदमितिध्येयम् गोध्वंसवत्त्वेनेति गवात्यंताभावस्य
गोध्वंसाविरोधित्वादित्याशयः नच दैशिकविशेषणतया यत्र गोध्वंसस्याधिकरणं तत्रैव गवात्यंताभावस्याविरोधात्
कालिकसंबंधेनगोध्वंसवत्यपि प्रलयेतदत्यंताभावसत्त्वे बाधकाभावान्नातिव्याप्तिरितिवाच्यम् प्राचांमते
भूतलादिदेशस्येवकालस्यापि दैशिकविशेषणतया ध्वंसवत्त्वात् अतएव त्वक्संयुक्तकाले दैशिकवि

यदि तत्वा तस्यैवात्राव्याप्तिर्दोषः न च कालिकसंबंधावच्छिन्नप्रतियोगिताकस्य

नित्यवर्तमानत्व

शेषत्वात्तया वायुनाशाधीनवायुस्पर्शनाशस्य सादीत्वकारः शब्दानित्यतायांमिष्टे रूक्तः यद्यप्येवमपि नातिव्याप्ति
संभवः कालिकसंबंधावच्छिन्न गत्यंतताभावस्यैव प्रलये कालिकसंबंधेन वर्तमानत्वात् ध्वंसादिमति दैशिक
संबंधेनैवात्यंताभावस्यानभ्युपगमात् तथापि प्रतियोगिवैयधिकरण्याघटितस्य व्याप्य वृत्तिसाध्यकस्यलीय
लक्षणस्या व पूर्वं दैशिकाविशेषण तया ऽभावे हेतुसामानाधिकरण्ये दैशिकसंबंधेन हेतुमान्निष्ठात्यंताभाव

कालं

स्याप्रसिद्ध्या तथापि नातिव्याप्तिरिति वाच्यम् इत्यादि शीतत्वादि विशिष्टगोत्वाभावस्यैव ताद्दशस्य प्रसिद्धत्वा
दिति भावः एतेनाभिमतं निरस्तुमाह सवतोऽभावेति अत्यंताभावपदेनेत्यादिः तथा च प्रलये गोत्वाद्यवच्छिन्न
ध्वंससत्वादेव नातिव्याप्तिरिति भावः नन्वेवं ध्वंसस्य गोत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेऽपि साध्यता
वच्छेदकसंबंधीभूतकालिकाविशेषणतावच्छिन्नप्रतियोगिताकत्वाविरहात्कुतस्तमादायातिव्याप्तिवु
द्धारइति वाच्यम् साध्यतावच्छेदकसंबंधात्यसंबंधावच्छिन्नस्यैव हेतुसमानाधिकरणाभावप्रतियोगित्व
स्य लक्षणे प्रवेशनीयत्वात्तस्य च ध्वंसप्रतियोगितासाधारण्यादिति भावः यदा स्पंद [illegible]
[illegible] इति स्पंदवान्तिखंड प्रलये समंगीतरीयघणक

तथा च अथ मतः परमाणुक्रियातत्तो द्व्यणुकावयवविभागस्तदुत्तरं पूर्वदेशसंयोगनाशस्तदुत्तरं परसदेशात्मककार्याद्धेतुउत्तरदेशसंयोगस्तत्रैव द्व्यणुकना शस्तदुत्तरं अवयवनाशाधीनस्य तदेशो नाशः स्पंदनाशश्च तदुत्तरमुत्तरदेशसंयोगनाशस्स एव महाप्रलयः १

[ये]

त्वावच्छिन्नध्वंससाविरहादतिव्याप्तिः ननु महाप्रलयवृत्तितीयक्षणे द्व्यणुकत्वावच्छिन्नध्वंससत्त्वान्नातिव्याप्तिस्तदानी
मपि चरमद्व्यणुकनाशानुगुणस्य परमाणुस्पंदस्य सत्त्वात्तत्कालोत्पन्नपरमाण्वुत्तरसंयोगेन प्रलयपूर्वक्षण एव पश्चा
त्तस्य विनाश्यत्वात्तादृशपरमाण्वुत्तरसंयोगस्य कार्यद्रव्येण सह वृत्तेः स्वीकारात् नित्यत्वमाश्रयनाशादेव तन्नाशसंभ
वादित्यत आह । यदादृष्टमिति केचित्तु त्वन्मते द्व्यणुकस्याभावात्स्पंदस्य चरवृद्धप्रलये वृत्तौ बलवत्तरप्रमाण
भावाद्यदादृष्टमित्याद्युक्तमित्याहुस्तच्चिंत्यम् नित्यज्ञानमादाय सहेतुत्ववारणाय नन्यमिति नित्यसुखाभिव्य
क्तेर्नित्यत्वमते सहेतुत्वमाशंकनसाध्यांतरमाह दुःखं वेति ननु कार्यमात्रं प्रति अदृष्टस्य हेतुत्वात्प्रलये प्राक्तनक्षणेपि
तस्य सत्त्वं तथा च तदानीमेव दुःखत्वावच्छिन्नध्वंससत्त्वान्नातिव्याप्तिः दुःखादेः स्वसमानकालनाश्यतया तदानीमसंभवा
दुत्तरक्षणे सामानाधिकरण्यासंभवादविदिते प्रमाणाभावाच्चाकिं च यावद्दुःखानां युगपत्प्रलयानभ्युपगमे ब्रह्मांडांतरवर्तिदुः
खमादाय सहेतुकत्वापमत आह यदा तदेति अत्र तदीयसुखादिसमवेतदीनानाविरहाद्व्यभिचारः स्फुट एव
ध्वंसादिप्रतियोगितायां सामान्यधर्मावच्छिन्नत्वे माभावाभावः गौर्नष्ट इत्यादिप्रतीते गोप्रतियोगिकध्वंसाद्यवगा
हितया व्युपपत्तेर्वाधानिश्चयादिप्रतिबंधकत्वाद्यनुरोधेनैव भेदान्वंताभावयोर्गोत्वावच्छिन्नप्रतियोगिताक

द्व्यणुकत्वादेरीति रवं प्रलये केषांचिद्दुःखस्य केषांचित्प्रागभावस्य सत्त्वेन द्व्यणुकत्वस्य प्रतियोगितावच्छेदक वृत्तित्वोनानवच्छेदकत्वात् इत्यर्थः ननु द्व्यणु
कत्वावच्छिन्नानधिकरणवृत्तित्वविशिष्टस्यैव तद्ध्वंसस्य प्रतियोगितावच्छेदकं द्व्यणुकत्वमेवेत्यत आह नहीति ॥

[न]

जा॰ सि॰

तद्धर्मकृतलक्षणमितप्रकारक तद्धर्मत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यताशालि बुद्धिं प्रति तद्धर्मत्वावच्छिन्नप्रतियोगिताकसंबंधाव च्छिन्न तद्धर्मत्वावच्छिन्नप्रकारतानिरूपितअभावत्वावच्छिन्नप्रविशेष्यतावच्छिन्न अभावत्वावच्छिन्नस्वरूपसंबंधावच्छिन्नप्रकारतानिरूपित भूतलत्वावच्छिन्नविशेष्यताशालिज्ञानं प्रतिबंधकम् २

१२

1416

त्वोपगमात् नचैवं तद्धर्मत्वावच्छिन्नवत्ताबुद्धिं प्रति तद्धर्मत्वावच्छिन्नाभाववत्तानिश्चयत्वेनाविरोधितया तद्ध
र्मात्यंताभावस्येव तद्ध्वंसस्यापि तद्धर्मत्वावच्छिन्नप्रतियोगिताकत्वमावश्यकमिति वाच्यम् एकसंबंधे
न तद्वत्यात्यंताभावस्य ग्रहेऽपि संबंधांतरेण तद्धर्मत्वावच्छिन्नवत्ताबुद्ध्युत्पादात् संबंधविशेषमंतर्भाव्यैवात्यं
ताभावग्रहस्य प्रतिबंधकतया ध्वंसवत्ताग्रहस्याधारत्वासंभवात् सत्त्वस्याभावत्वाघटितत्वेन तदवगा
हिबुद्धेरत्यंताभावसाधारण्याद्योगाद्वेत्यापाद्येनाह मतेऽपीति ननु प्रतियोगिमत्त्वस्य सिद्धं तत्राप्यत्यं
ताभावानुपगमादत आह अन्यस्येति तस्येति गोत्वादिनागवात्यंताभावस्येत्यर्थः तेन गगनाद्यभा
स वस्योविशिष्टगोत्वाद्यभावस्य वा समवायेन प्रतियोगितापि न क्षतिः कालमात्रेति अत्र गवात्यंताभावस्य दे
शीकविशेषणतया कालमात्रवृत्तित्वं प्राचीनैरभ्युपेतम् एवं सदा तेन तद्व्यवहारस्य कालिकविशेषणत
यैव संभवादिति तु दिभावनीयम् ननु प्रतियोगिविशिष्टेऽपि काले तदत्यंताभावसत्त्वे गवाद्यवच्छेदेने
दानीं गोत्वं नास्तीत्यापि प्रतीतिः कथं न स्यादत आह इयांस्त्वीति एकस्य प्रतियोगिमतः कालस्य देश
भेदः प्रतियोग्यनाधारदेशः तत्तात्वम् अत्यंताभाववत्त्वम् अपरस्येति ध्वंसादिमतः कालस्येत्यर्थः

राम॰

१२

स्वरूपावच्छिन्नमिति निरवच्छिन्नामित्यर्थः तथात्वमिति पूर्वेणान्वयः नन्वेवमिदानीमश्वेन गोत्वमित्यादिप्रती
तेः काल इतित याऽश्व इतितया च गोत्वाभावावगाहितयैवोपपत्तौ देशस्य काल इतितावच्छेदकत्वे माना
भाव इत्यत आह देशश्चेति इत्यर्थः साहश्यं तच्चानुभूयमानत्वं तथा चानुभव एव देशस्य काल इतितावच्छे
दकत्वे मानम् अन्यथा गृहे नेदानीं गौरितिप्रत्ययबलाद् गृहादिदेशस्य गवात्यन्ताभाववत्तायामपि कालेना
वच्छेदकः स्यात् तत्रापि गवाभावे गृह इतिवत् काल इतित्वोभयावगाहित्वापत्तेस्तु वचनत्वादितिभावः नन्वे
वमपि प्रतियोगिवैयधिकरण्यघटितस्याव्याप्य इतिसाधकस्य लीयलक्षणस्य गोमान्गोत्वादित्यादाव
तिव्याप्तिरेव गवाद्यभावस्य गृहादि कालेप्रतियोगीसमानाधिकरणतया लक्षणघटकत्वादाह तच्चेत्यश्वेति
गवादिश्व इत्येवेत्यर्थः तथा च यत्किंचिद्देशत्वाधिकरणावच्छेदेन प्रतियोगिवैयधिकरण्यपदग्रैवाव्यंतस्य गवा
द्यभावेपि सत्वान्नातिव्याप्तिरिति भावः नचेति वाच्यमित्यन्वयः संसर्गाभावविशेष इति सदातनसंसर्गाभा
व इत्यर्थः संसर्गेति स्वप्रतियोगितावच्छेदकसंसर्गेणयः प्रतियोग्यारोपस्तज्जन्यप्रतीतिविषयोभाववत्त्व
मित्यर्थः संसर्गस्तु तादात्म्यभिन्नो ग्राह्यस्तेन भेदव्युदासः प्रागभावध्वंसयोरप्युत्तरकालपूर्वकालावेव प्र

तानिष्ठान्यपामिश्यानित्यकत्वेसति ह्यव्यवहितशकुकालावच्छेदेन वर्तमानात्यंताभावप्रतियोगितानवच्छेदकधर्मावच्छिन्नसामानाधिकरण्यैत्तुन्यत्वे तत्पदेनदंडादेर्ग्रहणम् ३

स्वजन्यध्वंसमित्यकपालद्वयसंयोगेन नष्टेट्ट्यस्याभावः १

तद्वदन्यारातितिदत्वात्विघभहात आदि हत्वा... कादि प्रसंगः ४   ला ध्यं प्रतीयोग्यारोपः २

1418

तियोगितावच्छेदकसंबंधाद्वेति ताभ्यामेव संबंधाभ्यां प्रतियोग्यारोपः प्रागभावध्वंसयोः प्रत्यक्षे हेतुः तत्तद्योनि
व्याप्तेरिति प्राचामाशयः घटितमिति तथा च चक्रकादिप्रसंग इति भावः तच्च जन्यत्वेऽनियमान्तरस्य साध्यसंबंधि
तावच्छेदकरूपत्वादिस्वरूपस्येत्यपर्यद इति केचित् वस्तुतो नियमान्तरस्य संसर्गत्वघटितनियमस्य संसर्गत्वाविशि
ष्टधीजनकत्वं नियमघटितमितिक्रमेण संसर्गत्वमप्येवं विशेषोऽस्तीति भावः नन्वभावबुद्धौ प्रतियोग्यारोपस्य हे
तुत्वे मानाभावादुक्तसंसर्गाभावत्वघटितव्याप्तेरसंभवः कथं चेदभावलौकिकप्रत्यक्षं प्रत्यारोपस्य
हेतुतायां स्वीकारे व्यतीन्द्रियसाध्यकव्यभिचारिण्याप्तिव्याप्तिलक्षणे हेतुसमानाधिकरणसाध्याभावस्यातीन्द्रिय
तया निरुक्तसंसर्गाभावत्वविरहादतआह वस्तुतस्त्विति भेदाभिन्नाभावत्वं संसर्गाभावत्वं सदातनत्वावि
शिष्टं चतदेवात्यन्ताभावत्वं भेदत्वं तु संसर्गविधयाऽतादात्म्यावच्छिन्नप्रतियोगिताकाभावत्वमनुयोगिता
विशेषो वेत्याशयः यत्तु भेदत्वादिवत्संसर्गाभावत्वमप्यखंडोपाधिरिति तत्तुच्छम् भेदत्वादिवदखंडस्य संस
र्गाभावत्वस्यानुभवेनाविषयीकरणात् त्रिकव्यवहारस्य भेदाभिन्नाभावत्वादिनाप्युपपत्तेः वस्तुगति
मनुरुध्याह अनुपदमिति विवेचयिष्यत इति तदपि व्याप्तेनोपादेयानित्यादिग्रंथे नातिशयः साध्यतावच्छेदक

मनस्त्ववदस्मात्‌ स्यादौ ६

राम

संवंधेन प्रतियोगिवैय्यधिकरण्यघटितलक्षणमभिप्रेत्याह प्रयोजनाविरहादिति धूमादिसमानाधिकरणस्य व
ह्न्यादिभेदस्य प्रतियोगिसमानाधिकरणत्वादेव तमादाय नाव्याप्तिविरहादिति भावः व्याप्यवृत्तिसाध्यकस्थलीय
लक्षणस्य साध्यतावच्छेदकसंवंधावच्छिन्नप्रतियोगिताघटितत्वात्तदभिप्रेत्याह अव्याप्तिश्चेति तादात्म्येन ग
वादेः साध्यतायां तत्संवंधावच्छिन्नात्यंताभावाप्रसिध्या साध्याभाववत्त्वादाववव्याप्तिरित्यर्थः इदमप्यभावद्वातिर
भावो नाधिकरणस्वरूपो न वा धर्म्मीत्यंताभाव एव धर्म्मिणो भेद इति मतेन अन्यथा पटादिभेदरूपस्य घट
भेदत्वात्यंताभावस्य घटत्वात्यंताभावस्य वा घटनिष्ठप्रतियोगिताया एव तादात्म्यसंवंधावच्छिन्नत्वाद
व्याप्तिविरहादितिध्येयम् न च विषयतायाः वृत्त्यनियामकत्वमते ज्ञानाभावस्य गगनादौ सहजत एव प्रति
योगिव्यधिकरणत्वान्नातिव्याप्तिरत आह विशेषगुणेति अत्र व्यभिचाररूपकः कालो दिक् च तत्र च
काले कालिकसंवंधेन दिशि च दैशिकसंवंधेन विशेषगुणस्य सत्वात्तदभावो न प्रतियोगिव्यधिकर
ण इति भवत्यतिव्याप्तिः विशेषपदं व्यभिचारित्वरतापि द्रव्यत्वादिस्तु तौ संवंधसामान्येनाविशेषगुण
स्य गगनस्य सत्त्वान्नातिव्याप्तिसंभवः कालोपाधित्व वा दिगुपाधित्वस्यापि गगनस्य सत्वादव्यावर्तकत्वात्
महाप्रलये दिग्देशव्यवहाराजनकत्वात्

1420.

अन्यथा मनसः कालोपाधित्वमपि स्यादत उक्तं मनोऽन्येति यत्तु मूर्त्तमात्रस्यादिगुपाधित्वं महादिग्वृत्तितायामवच्छे-
दकत्वं न त्वधिकरणत्वमिति प्राचां मते संबंधसामान्येनैव तत्स्यादिशेषगुणानाधिकरणत्वान्मनोन्यपदमि-
ति तन्मन्दम् एवमप्यवच्छेदकतासंबंधेनैव मनसोऽविशेषगुणवत्तायास्संभवेन मनोन्यपदवैयर्थ्यापत्तेः
ननु स्वमते दिक्कालयोरीश्वरानतिरिक्तत्वादत्र व्याप्तिरेवेत्यत आह जातीति न च जातेर्व्याप्यवृत्ति-
तया तत्साध्यके प्रतियोग्यधिकरणप्रवेशादेव नातिव्याप्तिरिति वाच्यम् समवायेनाव्यापकत्वग्रह-
दशायामपि संबंधसामान्येन प्रतियोगिवैयधिकरण्यघटितव्यापकत्वस्तानात्समवायेन जात्यनुमि-
त्यापत्तेरेवमक्तेऽतिव्याप्तिपदार्थत्वाज्जात्यादेरपि प्रागुक्तव्याप्यवृत्तित्वविरहाच्च अतिव्याप्तिप्रयोज-
कानि साध्यमन्येति विशेषणतादि कुतो कालिकीच एककार्यमिति समवायस्यापि स्वात्मकएवत्वरू-
पसंबंध इति न अपि जात्येकार्थसमवायोऽतोन्यापशयः भावत्वात्समवेतत्वादिसाध्यकेचित् प्रतियोगि-
नेति न च वाच्यं सामानाधिकरण्यताद्रूपेनसमवायसंबंधेन घटादौ प्रतियोगिव्यधिकरणत्वान्नातिव्याप्तिः
न च तादृशयात्किंचित्संबंधेन प्रतियोगिसामानाधिकरण्यमात्रे तौ कौवान्दि सामानाधिकरण्याभावस्यापि

प्रमेयवत्पर्वतावच्छेदेन महानसीयसंयोगेन प्रतियोग्यसमानाधिकरणत्वाद्वह्निमान् धूमादित्यादावव्या
प्तिः स्वप्रतियोगितावच्छेदकसंबंधसामान्येन तथात्वोक्तौ च जातिमान् जातित्वादित्यादावतिव्याप्तिः
समवायेन जात्यभावस्यैव तादात्म्येन जातिमद्भेदत्वात्तस्य च स्वप्रतियोगितावच्छेदकतादात्म्यसंबंधेन
यज्जातिसंबंधितद्वृत्तित्वेन प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यम् स्वप्रतियोगित्वं यादृशसं
बंधावच्छिन्नं तादृशसंबंधेन यत्प्रतियोगिसंबंधितद्वृत्तित्वाभावस्योक्तत्वात् संयोगसामान्यावच्छि
न्नवह्न्यभावप्रतियोगितायां महानसीयसंयोगत्वादिविशिष्टानवच्छेद्यतया वह्न्यभावस्य पर्वता
दौ महानसीयसंयोगसंबंधेन प्रतियोगिसामानाधिकरण्यविरहेण व्याप्त्यभावादिति ध्येयम् ननु
समवायावच्छिन्नवह्न्यभावमादाय धूमादावव्याप्तिवारणाय संग्रे साध्यतावच्छेदकसंबंधावच्छि
न्नप्रतियोगित्वं निवेशनीयं तथा च कपिसंयोगवत्तत्तादात्म्येन साध्यतायामेतद्वृत्त्वादावव्या
प्तिर्भेदमात्रस्यैव स्वप्रतियोगितावच्छेदकतादात्म्यसंबंधेन प्रतियोग्यधिकरणप्रसिद्धेरत आह
संबंधिवेति न च तादात्म्येन वस्तुमात्रस्यैव व्याप्यवृत्तित्वात्तादृशसंबंधेन साध्यतायां प्रतियो

मिवैयधिकरण्याप्रवेशादिदमयुक्तमितिवाच्यम् मूलावच्छेदेन कपिसंयोगवद्भेदस्य वृत्त्यादौ त्वयमंगीका
रात्तादात्म्येन कपिसंयोगवतोप्यव्याप्यवृत्तित्वात् न चैवं प्रतियोग्यनाधिकरणहेतुमन्निष्ठाभावेत्यादीम
निष्कर्षेप्यप्रतीकारः प्रतियोगितावच्छेदकसंबंधेन यत्प्रतियोगिसंबंधिनस्तन्न घटितत्वावच्छिन्नभे
दकूटादिविशिष्टहेतुमद्वृत्तित्वस्यैव तत्र वक्तव्यत्वात् वस्तुतस्तु तादात्म्यसंबंधेनापि न कस्यापि वृत्त्यनु
क्तव्याप्यवृत्तित्वमतो यथाश्रुत एव सम्यक् केचित्तु प्रतियोग्यनाधिकरणहेतुमन्निष्ठाभावप्र
तियोगितायां यद्रूपावच्छिन्नत्वं यत्संबन्धावच्छिन्नत्वोभयाभाव इत्यादिवक्ष्यमाणनिष्कर्षस्य तादा
त्म्येन साध्यतायां व्याप्तिवारणपत्तिव्याप्तिरतः प्रतियोग्यनधिकरणत्वं परित्यज्य प्रतियोग्यसंबंधित्वं चावश्यं तत्र निवेश्यमि
त्याशयेन संबंधित्वमुक्तमित्याहुः ननु कपिसंयोगाभावस्यापि गुणादौ प्रतियोग्यसमानाधिकरणत्वात्कपिसंयो
ग्यतत्वादित्यादावव्याप्तिरत आह तद्विशिष्टस्येति प्रतियोगिसामानाधिकरण्याभावविशिष्टस्येत्यर्थः तथा च हे
तुमति द्रव्यादौ संयोगवद्वृत्तित्वाभावविशिष्टः संयोगाभावो नास्तीति नाव्याप्तिः विशिष्टनिरूपिताधेयत्वमप्यतिरिक्त
मित्याशयेनेदमुपात्तं तद्विशिष्टस्य तस्य हेत्वधिकरणेऽन्वयः तत्र च षष्ठ्यर्थोऽधिकरणत्वं तेन प्रतियोगिसा

1423

मानाधिकरण्याभावविशिष्टस्याधिकरणं यद्धेत्वधिकरणं तद्वृत्तित्वमभावे वाच्यमित्यर्थः अत्र यद्यपि प्रतियोग्यसमाना
धिकरणत्वं हेतुविशेषणीकृत्य प्रतियोग्यसामानाधिकरण्यविशिष्टो यो हेतुस्तदधिकरणवृत्त्यभावस्य प्रतियोगितानवच्छेद
कत्वं वाच्यम् तावतैव संयोग्येतत्त्वादित्यादौ नाव्याप्तिसंभावना वृत्त्यस्य प्रतियोगिवैयधिकरण्यावच्छिन्नहेत्वधिकरण
त्वाभावात् तथापि कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरण इत्यंश्रेमम् लाघवरसेन हेतुसमानाधिकरणाभावस्ये
वविशेषणं प्रतियोग्यसमानाधिकरणत्वदलमतएतावान्प्रयास इत्यवधेयम् ननु भेदस्य व्याप्यवृत्तितया प्रतियोगिसमाना

भिन्न

धिकरणत्वोक्तौ च प्रागुक्ताव्याप्तिवारणासंभवे तद्विशिष्टस्येत्यादिकं विफलमत आह तद्वृत्तीति प्रतियोगिमद्वृत्तिभिन्न
त्वमित्यर्थः अत्रेति अस्वरसादित्यन्वयः न तदभाववत्त्वामिति तथा च संयोगिसत्त्वादित्यादावतिव्याप्तिरिति भावः ननु सं
योगाभावे गुणत्वेन संयोगसामानाधिकरण्यमिति प्रतीतिबलादेव गुणत्वावच्छेदेन संयोगाभावे प्रतियोगिसामानाधिकरण्या
भावसत्त्वान्नातिव्याप्तिरत आह प्रतीतेरिति उक्तप्रतीतिस्तु संयोगाभावनिष्ठस्य संयोगसामानाधिकरण्यावच्छेदकत्वा

स्या

भावमेव गुणादौ संयोगानधिकरणभिन्नगुणवृत्तित्वमेव वा संयोगाभावादाववगाहत इति भावः वद्यपाति मूलकारः
तच्च तदपि हेत्वधिकरण इति तेन कापि संयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकीभूतगुणत्ववाच्छि

न्नत्वेपि कपिसंयोगे तत्त्वादित्यादौ नाव्याप्तिरिति भावः ननु हेत्वधिकरणे प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वं प्र
तियोगिसामानाधिकरण्यानवच्छेदकीभूतहेत्वधिकरणवृत्तित्वं तच्चाव्याप्यवृत्तेरवच्छेदकत्वाविरहादप्रसिद्धं गुरु
तरं चेत्यत आह प्रतियोग्यनधिकरणेत्यादि वृत्त्यादीति अनधिकरणमिति परेणान्वयः न तथा न्यंतरेति प्रति
योगिव्यधिकरणान्यतरत्वेत्यर्थः स्वमते संयोगसामान्याभावस्य केवलान्वयित्वात् तत्साध्यकं सत्त्वादिकं सद्धेतुरेवेत्यत साध्यां
तरमाह द्रव्यत्वाभावेति यद्यपि द्रव्यत्वाभावस्याव्याप्यवृत्तित्वात् तत्साध्यके प्रतियोगिवैयधिकरण्याप्रवेशाद्
इदमसंगतं न चात्र कालिकसंबंधावच्छिन्नद्रव्यत्वाभावस्साध्यस्तस्य च गुणाद्यवच्छेदेन कालेन वा व्याप्यवृत्तिरिति
वाच्यम् तथासति तस्य केवलान्वयित्वात् तत्साध्यकसत्त्वादेस्सद्धेतुत्वेन तत्राव्याप्तिरूपन्यासस्यानौचित्या
त्तथापि सत्त्वहेतौ द्रव्यत्वाभावस्य व्यभिचारधीदशायामपि प्रतियोगिसामान्यानधिकरणसत्त्ववन्निष्ठाभावप्र
तियोगितानवच्छेदकं द्रव्यत्वाभावत्वमित्याकारकव्यापकत्वज्ञानादनुमित्यापत्तेरेवाव्याप्तिशब्दार्थः व
स्तुतो द्रव्यत्वाभावस्यापि न प्रागुक्ताव्याप्यवृत्तित्वमिति ध्येयम् अथ समसाध्येऽतिव्याप्तिं आह यत्र साध्याभाव
वत्त्वमिति तत्प्रतियोगीति तस्य संयोगात्मकसाध्याभावस्य यः प्रतियोगी संयोगविशेषाभावस्तद्वत्त्वमित्यर्थः॥

प्रतियोगिव्यधिकरण
त्वं ताभावप्रतियोगि
त्वं केवलान्वयित्वं ४

राम

द्वितीये ऽतिव्याप्तिं योजयति नित्यत्वादीति नित्यत्वादिविशिष्टं यद् द्रव्यत्वं तदभावात्मको यः साध्याभावस्तत्प्रतियोगित
दधिकरणत्वात्साध्याभाववत्तो ऽद्रव्यस्येति पूर्वेणान्वयः ननु विशिष्ट द्रव्यत्वाभावो न द्रव्यत्वत्वरूपस्य साध्याभा
वस्य प्रतियोगी किंतु विशिष्ट द्रव्यत्वस्यैवेति द्रव्यत्वं प्रतियोगिव्याधिकरणमेवेत्यत आह त्वाभावेति त्वं नित्य
त्वविशिष्ट द्रव्यत्वम् न चानित्यत्वविशिष्ट द्रव्यत्वाभावस्याभावो नानित्यत्वादिविशिष्ट द्रव्यत्वत्वरूपो विशिष्टस्यान
तिरिक्ततया जन्यद्रव्ये ऽपि नित्यवृत्तित्वाविशिष्ट द्रव्यत्वाभावो नास्तीति प्रत्ययप्रसंगात्किंतु नित्यैकत्वादिकमेवे
ति नातिव्याप्तिरिति वाच्यम् विशिष्टाधिकरणतायाः प्रतीतिनियामकतयैवातिप्रसंगभंगे द्रव्यत्वमपेक्ष्य नित्यानंत
संख्यापरिमाणादौ नाद्दशाभावत्व कस्याप्यायां गौरवात्त्वाभावाभावस्यैव प्रतियोगित्वामीतीति सिद्धांतप्रवादाच्च
नन्वेवमपि पानीरविलाभावस्यैव त्वाश्रयतत्तद्व्यक्तिवृत्तित्वविशिष्टं यत्त्वं तदभावात्मकत्वप्रतियोगिना सह स
मानाधिकरणत्वात्प्रतियोगिव्याधिकरणाभावाप्रसिद्धेवनातिव्याप्तिरेकव्यक्तिमात्रवृत्तीनां गुणाद्यात्मकाभा
वानामपि पूर्वंतणवृत्तित्वाविशिष्टस्य त्वस्य योभावस्ताद्दशप्रतियोगिना सार्द्धसामानाधिकरण्यात् न चैवं द्युमा
णत्वं द्दशः प्रसिद्धा गगनाद्यभावएव प्रतियोगिव्याधिकरणस्तस्यापि नित्यवृत्तित्वादिविशिष्टेयो गगनाभावस्त

स्यपदेनघटवृत्तित्वविशिष्टघटाभावः घटेघटेनास्तीति प्रतीतिसाक्षिकः तस्यमोऽभावः सएवं तेवर्तेतेतस्य योऽभावः सप्त यमाभावरूपः
एवं वदिविशिष्टभूकालादि रिक्ते ऽतिव्याप्येन घटवृत्तित्वविशिष्टघाभावः शुद्धघटाभावस्वरूपएवतन्यायेन तेनघटकी
नो घटाभावो घटवृत्तित्वविशिष्टघटाभावाभावरूपप्रतियोगिसमानाधिकरणएवएवमसत्तापि ४

१

दभावात्मकेन स्वप्रतियोगिना समं समानाधिकरणत्वात् गगनाभावस्यैव संयोगादिसंबंधेनाभावत्वावच्छिन्नाभावतया खंड
शः प्रसिद्धापि तस्य प्रतियोग्यधिकरणत्वासंभवाच्च एतेन नित्यत्वादौ शिष्टगगनाद्यभावस्य योभावस्तदभावत्वं न गग
नाद्यभावस्य तस्य केवलान्वयितया नन्योपि नित्यत्व तित्वादौ शिष्टस्य गगनाद्यभावस्याभावो नास्तीति प्रत्यय प्रसंगात् किं
तु नित्यत्वादेरेव तत्पादत्वमित्युक्तावपि न निस्तार इति चेदत्र नव्याः यथा श्रुते प्रागुक्तक्रमेण प्रतियोगिव्यधिकरणाभाव
स्याप्रसिध्या वन्हिमान् धूमादित्यादौ सर्वत्रासंभवः स्यादतः यत्किंचित्प्रतियोगित्वं यादृशसंबंधावच्छिन्नं तादृशसंबं
धेन स्वप्रतियोगितावच्छेदकावच्छिन्नसामान्यानाधिकरणं यत्साधनाधिकरणं तन्निष्ठाभावस्य साध्यतावच्छेदक
संबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वमेव लक्षणतो प्रवेशनीयम् तथा च सद्धेतुस्थले द्रव्यत्वाभाववान् सत्वा
दित्यत्रापि संयोगेन घटाभावः प्रतियोगिव्यधिकरणस्तदीयं हि घटनिष्ठप्रतियोगित्वं यादृशेन संयोगसंबंधेनावच्छि
न्नं तादृशेन संयोगसंबंधेन साधनवतो द्रव्यस्य तदीयप्रतियोगितावच्छेदकावच्छिन्नसामान्यानाधिकरणत्व
मतस्तमेव न चैवमपि तदीयसाध्यतावच्छेदकीभूतस्वरूपसंबंधावच्छिन्नप्रतियोगित्वस्याप्रसिध्या न दोषसंग
तिः पूर्वलक्षणवन्नित्यत्वादिविशिष्टस्य घटाद्यभावस्याभावे न तत्प्रसिद्धेरिति प्राहुः स्वावच्छेदकसंबंधावच्छिन्न

स्वप्रतियोगिता १

राम

1427

प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसामान्यानधिकरणहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यत्संबंधावच्छि
न्नत्वयद्धर्मावच्छिन्नत्वोभयाभावइत्याग्रिमलक्षणाभिप्रायेणेदं संयोगेन घटाद्यभावस्यैव प्रतियोगिवैयधिकरण्यसौलभ्या
दित्यपि वदंति प्राचांमते संयोगसामान्याभावसाध्यकद्रव्यत्वहेतुर्दिगादौ ऽतः कपिसंयोगसामान्याभाव उक्तः वृक्षादावुत्पत्ति
कालावच्छेदेन गुणसामान्याभावसत्वाद्वृक्षत्वादिकं परित्यज्यात्मत्वं हेतुरुक्तः यद्यपि वृक्षादेः स्वसमवेतकपिसंयोगप्र
व
तियोगिस्वसमवेतसामान्याभावस्य द्रव्यमात्र समवेताभावस्य चानधिकरणत्वात् वृक्षत्वादेरपि हेतुतायामव्याप्तिस्स
म्भवत्येव तथापि सत्ताद्रव्यत्वयोरेव समवेताभावद्रव्यमात्रसमवेताभावयोरभाववत्वं लाघवान्न कपिसंयोगाद्यात्मकसम
वेतमात्रस्य तथात्वं गौरवादित्याशयः गुणसामान्याभावस्य संयोगप्रतियोगित्वमाविष्कर्तुं गुणानामित्युक्तं तत्प्रतियो
गितेति कपिसंयोगीयप्रतियोगितावच्छेदकेत्यर्थः नच गुणसामान्याभावस्याभावो द्रव्यत्वमेव लाघवान्न तु गुणगौ
रवादतस्संयोगप्रतियोगित्वं न गुणसामान्याभावस्येति वाच्यम् घटादावुत्पत्तिदशायां गुणसामान्याभावस्यैव सत्वेन द्र
व्यत्वस्य तदभावत्वासंभवादभावाभावस्य प्रतियोगित्वनियमाच्चेति भावः प्राञ्चो ऽति तथाच गुणसामान्याभाव
निष्ठप्रतियोगितावच्छेदकं यद्गुणसामान्याभावत्वं हेतुमत्तत्तदवच्छिन्नानधिकरणत्वेपि कपिसंयोगाभावत्वस्य

तादृशप्रतियोगितानवच्छेदकत्वात् तादृशेण साध्यतायामभावहेतौ नाव्याप्तिः द्रव्यत्वाभाववान् सत्वादित्यादौ तु
द्रव्यत्वाभावत्वावच्छिन्नानधिकरणं च हेतुकरणं तादृशाभावस्य तादृशप्रतियोगितावच्छेदकमेव द्रव्यत्वा
भाववत्त्वमतो नातिव्याप्तिरिति भावः नच वह्निमान् सत्वादित्यादौ तत्र वह्निसंयोगसंबंधेन साध्यतायामव्या
प्तिस्तत्संबंधावच्छिन्नघटाद्यभावप्रतियोगितया न तेन संबंधेन प्रतियोग्यधिकरणप्रसिद्धेरिति वाच्यं यत्प्रतियो
गितावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपितत्वस्य संबंधेन यादृशप्रतियोगितावच्छेदकावच्छिन्नाधि
करणतासामान्याभाववत्त्वं हेतुमत्त्वेन संबंधेन तादृशप्रतियोगितावच्छेदकत्वस्याविवक्षितत्वात् घटत्वावच्छि
न्नाधिकरणतासामान्यस्येव न तु वह्निनिरूपितसंयोगसंबंधावच्छिन्नाधिकरणतानिरूपितस्वरूपसंबं
धेनाभावस्य हेतुमति सत्त्वेन तादृशसंबंधेन घटाभावस्येव प्रतियोगिव्यधिकरणत्वात् तादृशाभाववत्त्वं
चानिरवच्छिन्नाधिकरणतायेन बाध्यमतः कालिकसंयोगाधिकरणत्वाभावस्य स्वरूपतः वृत्तित्वेऽपि नाव्याप्तिः
अत्र च प्रतियोगितावच्छेदकधर्मेणावच्छिन्नत्वं साध्यतावच्छेदकताघटकसंबंधेन ग्राह्यम् तेना
यः पिंडस्यापि कालिकसंबंधेन यद्धूम[illegible]त्वादौ रीष्टं धू॰ त्यादिन स्य संयोगेनाधिकरणत्वेऽपि धूमवा

न

श

राम

न्वह्नेरित्यादौ नातिव्याप्तिः प्रतियोगितावच्छेदकताघटकसंबंधेन तदवच्छिन्नत्वनिवेशात्तु प्रतियोगितानवच्छे
दकामित्यत्रावच्छेदकत्वं साध्यतावच्छेदकताघटकसंबंधेन ग्राह्यम् अन्यथा विषयतासंबंधेन रूपत्वाव
च्छिन्नस्य घटादिवृत्त्यादौ समवायेनाभावस्य सत्त्वाद्रूपवान् पृथिवीत्वादित्यादावव्याप्तिप्रसंगात् वस्तुतस्तु साध्यता
वच्छेदकताघटकसंबंधावच्छिन्नं यत्प्रतियोगितावच्छेदकत्वं तन्निरूपितत्वरूपसंबंधेनैव निरुक्तप्रतियोगिताव
च्छेदकत्वस्याभावः साध्यतावच्छेदकधर्मे विवक्षणीयः तेन वह्निमान् धूमादित्यादौ यत्र वह्नित्वादिनिरूपितसम
वायादिसंबंधेन वह्नित्वादेः साध्यतावच्छेदकत्वं तत्र तादृशसंबंधावच्छिन्नस्य प्रतियोगिव्यधिकरणहेतुम
न्निष्ठाभावप्रतियोगितावच्छेदकत्वस्याप्रसिद्धावपि न क्षतिरिति ध्येयम् अत्र तादृशप्रतियोगितावच्छेदक
धर्मे तादृशप्रतियोगिताश्रयाधिकरणीभूतयद्व्यक्तिनिष्ठाधिकरणतानवच्छेदकत्वस्याधिकरणताव
च्छेदकत्वस्य च द्वयोर्व्यतिरेकात्तद्व्यक्तिभेदकूटवत्त्वमेव तादृशप्रतियोगितावच्छेदकावच्छिन्नानाधि
करणत्वमित्यस्याप्यविरोधः तेन धूमवानित्यादिप्रतीतेरवच्छेदकताभिः पर्वतत्वादितत्तद्धर्मविशिष्टधू २५
मत्त्वावच्छिन्नाधिकरणताव्यक्तिभिरेवोपपत्तौ धूमत्वाद्येकधर्मावच्छिन्नाधिकरणतायां मानाभा
न धूमादिसामान्याभावप्रतियोगितावच्छेदकं धूमत्वादिकं तदवच्छिन्नाधिकरणत्वाप्रसिद्ध्याव्याप्ति

धूमवान्वन्हेरित्यादौ नास्ति व्याप्तिः धूमादिकारणतत्त्वात्किं भेदकूटवत्वमादायैव धूमसामान्याभावस्य प्रतियो
गितावच्छेदकावच्छिन्नत्वे व्यधिकरणस्यासंभवादिति मेयम् नन्वत्र प्रतियोगित्वं नातिरिक्तपदार्थः प्रतियो
गित्वादिकं तु स्वरूपसंबंधविशेषः नन्वतरं येषां विशेषणत्वं तु स्वरूपसंबंधाविशेषः घटपटादिप्रतियोगि
स्वरूपत्वादावाद्यमानत्वमादित्यादौ संबंधासंभवः घटादिस्वरूपस्यैकस्यैव पटाद्यभावप्रतियोगित्वस्य
पटत्वसमवेतत्वे सोपाधावाद्यवच्छिन्नतया नाद्यावच्छेदकीभूतत्वेपत्वाद्यवच्छिन्नस्य हेतुमातिसत्वा
त्प्रतियोगी व्यधिकरणाभावासिद्धेः घट प्रतियोगितावच्छेदकस्वरूपमेव प्रतियोगित्वमित्यदो
षः समवायेन वन्हेः साध्यत्वे धूमादावतिप्रसंगात्समवायावच्छिन्नवन्ह्यभावस्य वान्हित्वस्वरूपं
प्रतियोगित्वं समवायसंयोगादयापि तदवच्छेदकसंबंधतयापावच्छेदकीभूततादृशसंबंधेनसा
धनवत्तः प्रतियोग्यनधिकरणत्वाभावात् प्रतियोगितावच्छेदकीभूतयात्किंचित्संबंधेन प्रतियोग्य
नाधिकरणत्वोक्तावतिप्रसंगोन वाद्ये साध्यके धूमादावव्याप्तिस्समवायावच्छिन्नवन्ह्यभा
व [illegible] स्यैव समवायेन प्रतियोगिव्यधिकरणस्य वान्हित्व स्वरूपं यत्प्रतियोगित्वं तस्यैव संयोगे
नावच्छिन्नत्वादिति चेद्वक्तव्यं प्रतियोगिस्वरूपमवच्छेदकस्वरूपं वा यत्प्रतियोगित्वं तदपि

कस्यचिदभावस्य केनचिदेव धर्मेण संबंधेन वावच्छिन्नत्वव्यवहाराद् बलान्नतु सर्वेणाधर्मेण संबंधे
नवा समवायावच्छिन्नवन्ह्यभावप्रतियोगित्वं संयोगसंबंधावच्छिन्नमित्यादिव्यवहाराभावात्
तथाच यदभावीयप्रतियोगितावच्छेदकसंबंधेन यदभावीयप्रतियोगित्वानिरूपिता
वच्छेदकीभूतधर्मावच्छिन्नासंबंधित्वं हेतुमतस्तदभावीयप्रतियोगित्वानिरूपितावच्छेद
कताशून्यत्वं साध्यतावच्छेदकेऽविवक्षितमित्यदीधितिः यत्प्रतियोगितेत्यपहाय यादृशप्रति
योगितेत्यभिधानादेव तादृशार्थलाभात् नच प्रतियोगितावच्छेदकत्वरूपं यादृशप्रतियोगि
त्वं तदा यदभावीययादृशप्रतियोगितावच्छेदकसंबंधेन तदभावीयतादृशप्रतियोगित्वा
वच्छिन्नस्यानधिकरणत्वं हेतुमत इत्येव सम्यक् प्रतियोगितावच्छेदकावच्छिन्नत्वप्रवेशो
व्यर्थ इति वाच्यम् वन्हिधूमोभयवान् वन्हेरित्यादावतिव्याप्त्यापत्तेर्हेतुमात्रस्यैव वन्हिधूमो
भयत्वावच्छिन्नाभावप्रतियोगित्वादित्यलं कुरुचरणाः प्राग्वसामानाधिकरण्यघटितं परा
मर्शि प्राग्वसाध्यसामानाधिकरण्यमित्यर्थः संबंधविशेषेणेति व साध्यसाधनयोस्सामानाधि

मातिकृमते साध्यसामानाधिकरण्यंविरोधः साध्यव्यापकीभूताभावप्रतियोगित्वमत्रापि एवंतत्सामानाधिकरण्यज्ञानमनुमितिबंधकत्वम् १ प्रतिबंधकज्ञाने प्रकारीभूतौ ह्यः
यथागौरश्वत्वात्
यथावह्निमान्जलात्

एवंचमीनादि [illegible]

करणत्वानादनुमितिः तच्चेप्रतिबंधकतयैवाविरोधस्यहेत्वाभासत्वामितिमतेनेदम् यदिच्छयेनकेनापि
संबंधेनसाध्यसाधनयोःसामानाधिकरण्यज्ञानादनुमितिस्तत्रव्यापकसाध्यसंबंधितामात्रंवाव्याप्तिर्व्या
पकत्वदलेसाध्यसाधनयोस्संबंधविशेषप्रवेशादेवातिप्रसंगभंगादितिविभाव्यते तदामर्शेत्तासा पर
धनत्वानुमित्यायसाध्यस्यग्राह्यंयत्तत्तावच्छेदकधर्मेणग्राह्यंसामानाधिकरण्यंतत्रप्रविष्टोपाद
यासंबंधःत्वयंबोध्यः धूमवान्वह्नेरित्यादौसमवायावच्छिन्नसंयोगेनसहेतौसंयोगमात्रेणहेतुमत्ता सा
ध्यव्याप्तिरेवंद्रव्यत्वसाध्यकेघटानुयोगिकसमवायेनसत्त्वादिहेतौसमवायमात्रेणतद्वत्ता साध्या
पीत्यतोपसंबंधःत्वयवद्यावयवाद्दशसंबंधःप्रयुक्तम् साध्यसंबंधेति ग्राह्यसामानाधिकरण्येप्रविष्टर
त्यन्वयः धूमादिकात्र्येनसंयोगेनवह्निसामान्याभावसत्वाद्वह्निमान्धूमादित्यादावव्याप्तिरतोत्रा
पिवाच्यसंबंधःप्रयुक्तम् तेनसंबंधेनवह्नेरनुमानेन्यायफलमाह धूमसमवायीति प्रतियोगिता
वच्छेदकान्योपिवह्नित्वसमानाधिकरणत्वान्वयः साध्यसंबंधेत्यादेःफलमाह धूमसंयोगीत्या
दे ननुतादात्म्येनगवादेःसाध्यत्वेगोत्वादावव्याप्तिस्तत्रसाधनवानिरूपणान्योन्याभावप्रतियोगिता

सास्नादित्वंचगवाद्यवयवसंयोगविशेषः तत्त्वसमवायिसमवेतत्वसंबंधेनगविपतेहेतुः १ राम

ण्यनधिकरणहेत्वधिकरणाप्रसिद्धेः ननु संबंधविशेषेण साध्यसाधनयोस्सामानाधिकरण्यप्रवेशे तादात्म्येन हेतुसा
ध्याभावे व्याप्तिस्तत्संबंधेन साध्यसाधनयोरधिकरणाप्रसिद्धेरत आह एवं चास्यैतेइति संबंधविशेषानिवेशोऽस्यैत इत्यर्थः
सामानाधिकरण्यादावित्यादिपदेन हेतुसामानाधिकरण्यप्रविष्टहेत्वधिकरणत्वस्य परिग्रहः प्रयोजनमाह तथा
चेति धर्मिणोपीति तादात्म्येन व्याप्यत्वं व्यापकत्वं चानिर्वहतीत्यर्थः अन्यथा तादात्म्येन हेतोस्साध्यस्य चाधिकरणाप्र
सिद्ध्या न तन्निर्वाह इति भावः योन्योन्याभाव इति योभाव इत्येव वक्तुमुचितमन्योन्याभावत्वानिवेशवैयर्थ्यादिति ध्येयम्
तदनवच्छेदकवान्हिमत्वेति वान्हिमत्वं च स्वाधिकरणत्वं तच्चाधिकरणव्यक्तीनां भेदेप्यभिन्नमेवेत्याशयेनेदम् अत्र
साध्यसाधनयोरिव तदीयसंबंधयोरपि भेदे न व्याप्तेर्भेदस्तत्तादात्म्येन हेतुसाध्यकस्थले हेतुनिष्ठाभावाप्रतियोगिसा
ध्यतादात्म्यमेव व्याप्तिर्वक्तुमुचितेतिवदंति एवमिति साध्यसामानाधिकरण्यादौ संबंधानिवेशे कृत इत्यर्थः ध
र्मिण इति वस्तुन इत्यर्थः तथा च गोस्सास्नावत्वाद्वान्हिमान्धूमवत इत्तादात्म्यसंबंधेन व्यापकताव्याप्यतापि सं
गच्छत इति भावः ननु तादात्म्येन धर्मिणो धर्मव्याप्यतायामप्रसिद्धं न इत्यत आह अतएवेति धर्मिणो धर्मव्या

याःसाध्यताघटकतादात्म्यसंबंधावच्छिन्नत्वे मानाभावस्य स्वरूपमेव वैशिष्ट्याधिकारादिष्वप्यनुक्तत्वादेवं धनी चैत्रत्वादि

त्यादौ वृत्त्यनियामकस्वामित्वादिसंबंधेन धनादेः साध्यतायामापत्तौ दृशसंबंधावच्छिन्नप्रतियोगित्वाप्रसिद्धेरतआ

ह यद्वेति यत्तु प्रतियोगितावच्छेदकसंबंधेन तद्धेतुव्यधिकरणं प्रवेश्य पुनः प्रतियोगितायां साध्यता [illegible]

तावच्छेदकसंबंधावच्छिन्नत्वविवक्षायां गौरवात् अदेस्यादिकल्प इति तन्न संबंधांतरावच्छिन्नतत्तन्निष्ठप्रतियोगिता

वच्छेदकभेदकूटघटितत्वेन यद्वेत्यादिकल्पस्यैव गुरुत्वादित्याशयः संबंधभेदेन साध्यतावच्छेदकसंबंधेन न यो

त्तमतन्दपदस्य पर्वतादावनुयोगिकसंयोगादिना वन्ह्यादेः साध्यतायां तत्र धूमेऽव्याप्तिस्तादृशप्रतियोगितावच्छेदकसंबं

धेन प्रतियोगिनो यदधिकरणं तद्वृत्तित्वस्य साध्यतावच्छेदकसंबंधेन यत्प्रतियोगिसंबंधितद्वृत्तित्वस्य वा हेतुमत्यप्र

सिद्धेरिति वाच्यम् तादृशप्रतियोगितावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपितत्वविशेषणविशेषेण साध्यता

वच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपितत्वविशेषणतादिशेषेण वा तादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकर

णत्वसामान्याभावस्योक्तत्वात् अन्यथा कालिकसंबंधेन सर्वस्यैव हेतुमतः प्रतियोग्यधिकरणतावत्त्वात्प्रतियो

तथा चायमभिप्रायः गोत्वत्वग्रहदशायामेव भूततान्यापकतावच्छेदकत्वज्ञानात् गोत्वविधेयकत्वं मनुमितेर्वक्तुं शक्यम्मतावित गवेतरासमवेतत्वरूपस्य
गोत्वानिरूपितव्याप्तिग्रहाद्गोत्वाविधेयकत्वस्तु च समेवेति किं धर्मित्वोधर्मव्यापकत्वेनेति ८

ज्ञा·ग·मि·

२२

त्वं गोत्वत्वेति गोत्वत्वं गवेतरावृत्तित्वं तथा च गवेतरावृत्तित्वरूपायां गोत्वव्याप्तेर्ज्ञानदशायामुक्तरूपायाः यं गौरित्यनुमिते
र्गोत्वाविधेयकत्वासंभवाद्गोविविधेयकत्वमेवेति तदनुरोधादवश्यं धर्मित्वोधर्मव्यापकत्वं वा व्याप्तिमिति भावः ननु
गोत्वस्य साध्यत्वेपि गोत्वं हेतुमान्निष्ठाभावप्रतियोगितावच्छेदकमित्याकारकव्याप्तिधियोनुमितिहेतुत्वात्तत्र च धर्मि
तावच्छेदकाविधयैव गोत्वत्वग्रहस्यापेक्षितत्वात्तदग्रहे गोविधेयकानुमितिरप्यनुपपन्नेत्यत आह आदीति
आदिना पक्षधर्मता संग्रहः तथा च गवेतरावृत्तित्वव्याप्तेस्सास्नाव्यापकतावच्छेदकत्वग्रहे धर्मितावच्छेदक
तयोपायास्थितिं प्रोक्ष्यापि तादृशीश्रृस्य पक्षे पक्षधर्मताधीस्तत्रैवायं गौरित्यनुमितेर्गोविधेयकत्वमावश्यकमिति
तदनुरोधेनैव तादात्म्येन धर्मित्वोधर्मव्यापकत्वं वा व्याप्तिरित्याशयः यत्तु शुद्धगोत्वावच्छिन्नाविधेयकानुमि
तिंप्रति निरवच्छिन्नगोत्वविशेष्यताकमेव प्रतियोगितानवच्छेदकत्वज्ञानं हेतुरतो गोत्वत्वाग्रहेपि गोत्वेसा
स्नादिव्यापकत्वावच्छेदकत्वग्रहसंभवाद्गोसाध्यकानुमितेर्नानुपपत्तिरभावलौकिकप्रत्यक्षएवाधिक
रणतावच्छेदकरूपेणोपस्थितेर्हेतुत्वादिति मतं तन्तुच्छम् व्याप्तिज्ञानाप्रतिबध्यतयातादृशव्यापकताग्र
हस्यानुमित्यहेतुत्वात् अन्यथा तुल्ययुक्त्या शुद्धगोत्वाविधेयकानुमितिंप्रति निरवच्छिन्नाविशेष्यता

न

न

निष्ठ

चार

ताम

२२

1435

1436

प्यत्वादेरित्यर्थः तत्र तत्र व्यतिरेक्यादिग्रंथे ननु समवायेन जलादेः पृथिवीत्वाभावव्याप्यत्वपरतयैव तत्र फक्किसंगतिरि
त्याशंक्य तत्प्रयासाति पृथिव्यां जलादिभेदसाधनार्थं तद्धेतूपन्यासो न स्यात् व्यापकतावच्छेदकसंबंधेन व्यापकाभावेन व्याप्यता
घटकसंबंधावच्छिन्नव्याप्याभावस्यैवाक्षेपादित्यन्यथासिद्धिं दृष्टांतपूर्वकं परिहरति यथा चेति धूमाभाववदित्यत्र न वह्नि
धीरित्यन्वयः कथमिति नियम उपपद्यत इति परेणान्वयः महानसे संयोगेनेति नानिवर्ततेत्यन्वयः न संयोगाव
भावा च्छिन्नानुमितौ भासत इति तदर्थः निवर्ततेत्येतद्धूमति पूर्वेणान्वयः तादात्म्येनेवेति समवायेन व्याप्यतायां
समवायेन जलत्वत्वेनाभावत्वसिद्धेरिति जलभेदसाधनार्थं तत्फक्किवतारो न स्यादिति भावः नन्वेतावतापि ता
दात्म्यावच्छिन्नजलाभावासिद्धौ न तु जलान्योन्याभाव इति न दोषः तावद्वस्तुमतत्राह स एवेति धर्मिणो धर्मव्या
प्यत्वे प्राचां संवादमुपन्यस्य धर्मिणो धर्मव्याप्यत्वे न मानमाह इत्यभेदचेति धर्मिणो धर्मव्यापकत्वे युक्तिम
प्याह अत एवेति धर्मिणो धर्मव्यापकत्वादेवेत्यर्थः नान्वीयं गोरित्यनुमितिर्गोवेतरावृत्तिरूपायाः शृङ्गो त्व
त्वनिरूपितव्याप्तेर्ज्ञानात्समवायेनानिरवच्छिन्नगोत्वसाध्यकेव भाविष्यति साध्यवदन्यावृत्तित्वरूपाया
व्याप्तेरनुमितिहेतुत्वस्याग्रे वाच्यत्वादत एवानुमित्यनुरोधाद्धर्मिणो धर्मव्यापकत्वस्वीकारोनुचित इत्यत उ

योगितावच्छेदकत्वेऽपि यद्द्वितीयकल्पानुसारेण व्यापकत्वं संपादयति साध्यतावच्छेदकसंबंधेनेति तथा च संबंधा
न्तरावच्छिन्नघटाद्यभावमादायैव लक्षणसमन्वय इति भावः द्रव्यत्वं गगनासंयुक्ताद्विभ्वंतरेण व्यभिचाराद्धेत्वंतर
माह पृथिवीत्वादिति व्यापकत्वमपीति गगनादेरिति पूर्वेणान्वयः नन्वेवं निरुक्तव्याप्तिज्ञानाद्घटो गगनवानि
त्यनुमितिः प्रमा स्यादत आह सिद्धिरपीति तथैव वृत्त्यनियामकसंयोगेनैव तथा च तादृशसंबंधेन गगनानुमितेः
प्रमात्वमिष्टमेवेति भावः तेनासंबंधित्वादिति येन संबंधेन साध्यसामानाधिकरण्यं परामर्शे भासते तेनैव
संबंधेन साध्यानुमितेः फलत्वादिति भावः सामानाधिकरण्यधीयो हेतुत्वस्य तद्देशे संबंधाविशेषानिवेशस्य
वानंगीकारमतेऽप्याह अव्यापकत्वाच्चेति तेनेत्यनुषज्यते तथा च तादृशसंबंधेन साध्यस्य हेतुव्यापकत्वग्रह
त्ते तेनैव संबंधेन साध्यसिद्धिफलमतो निवृत्तिनियामकसंबंधेन व्यापकत्वासंभवादेव न तेन साध्यस्य प्रमा
नुमितिरिति भावः ननु वृत्त्यनियामकसंयोगेनापि गगनस्य पृथिवीत्वादिव्यापकत्वं दुर्वारं तादृशसंबं
धेन संबंधस्य प्रसिद्ध्या गगनाभावस्य प्रतियोगिव्यधिकाधिकरणत्वाभावात्तादृशाभावांतरप्रतियोगी

स्प
क
त्वे
के
पम

या

कस्य प्रतियोग्य । नधिकरण हेतुमन्निष्ठाभावप्रतियोगित्वज्ञानस्य हेतुत्वादयं गौरित्यनुमितेर्गोत्वत्वाद्यनुपस्थिता
वपि गोत्वरूपधर्मिसाध्यकत्वस्य दुर्वारत्वादिति दिक् । प्राञ्चस्तु गोतादात्म्यस्य सास्नाव्यापकत्वग्रहादेव गोतादा-
त्म्येन सिद्धिसंभवान्न तदनुरोधेन गोतादात्म्येन व्यापकत्वस्वीकारो युक्तः संबंधगतव्यापकत्वग्रहादेव संबंधि-
नोनुमितेर्भिन्नत्वादेः संभवात् । तदुक्तं गोत्वत्वाद्यग्रहदशायामिति गोतादात्म्यत्वाद्यग्रहदशायामित्यर्थः
इत्यर्थः स्वाहुस्ताद्विन्त्यम् गोत्वत्वाद्यग्रहदशायामित्यस्य गोत्वत्वेनाग्रहोपस्थादितिव्युत्पत्त्या गोत्वस्यावाध
निश्चयदशायामित्यर्थः तथा च तदानीमयं गौरित्यनुमित्यर्थं धर्मिणो धर्मव्यापकत्वमवश्यं स्वीकार्यमि
त्यपि वदन्ति गौरिति सिध्यतीति परे । अन्वयः गोर्व्यतिरेकादिति तादात्म्येनेत्यनुषज्यते । एवं चेति सामानाधि
करण्यापादौ संबंधित्वानि वेशे चेत्यर्थः संयोगत्वेन संयोगमात्रस्य प्रतियोगितावच्छेदकसंबंधत्वे वृत्त्यनियाम
कसंयोगस्यापि तत्वं स्यादिति सिद्धमतो मात्रपदम् संबंधरूपत्वमिति अन्यथा तादृशसंबंधावच्छिन्नप्रतियोगि
ताकाभावाप्रसिद्ध्या गगनादेः पृथिवीत्वादिव्यापकत्वं दुर्घटमेवस्यादिति भावः तादृशसंबंधस्य प्रति

1438

लिकसंबंधावच्छिन्न[यत्कि]ञ्चिदभावसत्वात् वह्न्येवं विधो वाच्यत्वादित्त दनधिकरणदेशाप्रसिद्ध्या तदवच्छेदेन कालिक
संबंधावच्छिन्नवाच्यत्वाभावस्य दैशिकाविशेषणतया काले संभवादिति भावः नस्यादिति तथा च कालो घटवान्म
हाकालत्वादित्यादौ व्याप्तिलक्षणाव्याप्तिरिति भावः प्रथमविवक्षानुसारेण दोषं संगमयति स्वावच्छेदकेति प्रति
योगितावच्छेदकसंबंधेनेत्यर्थः काले महाकाले तत्संबंधावच्छिन्नत्वस्य साध्यतावच्छेदकीभूतकालिकसंबंधा
वच्छिन्नत्वस्य संभवादित्याशयेनाय(?)मस्य चयः द्वितीयविवक्षानुसारेणतमाह तेनेसंबंधेनेति साध्यतावच्छेदकीभूत
कालिकसंबंधेनेत्यर्थः ननु महाकालान्यत्वविशिष्टघटाभाव एव प्रतियोगिव्यधिकरणस्सुलभः न चात्राविशे
षणौ विशेषशब्देन महाकालनिरूपितविशेषणतया एवावृत्तित्वादेतादृशसंबंधेन निरुक्तप्रतियोग्यधिक
रणाप्रसिद्धे रुक्ताभावस्यापि प्रतियोगिवैयधिकरण्यासंभव इति वाच्यम् तथा सति कालवृत्तिधर्मस्य तादृश
विशेषणतया किमपि व्यापकं न स्यादित्यस्यैवसम्यक्त्वे ऽष्टद्रव्यातिरिक्तेत्यायाभिधानस्य संदर्भविरोधापत्तेः स्वरूप
संबंधेन गगनादेर्वृत्तिमत्त्वे त्या(?)गमियग्रंथादिविरोधप्रसंगाच्च महाकालीयविशेषणतया गगनादेर्वृत्तिमत्त्वेपि

त्वि

1440

त्वस्य च गगनादावसत्वादत आह व्यक्तीति इदं वृत्तिनियामकसंबंधेन गगनादेरव्यापकत्वं तथा च निरुक्तप्रति
योगित्वेऽप्यादिनावक्ष्यमाणप्रतियोगिवैयधिकरण्यं वृत्तिनियामकसंबंधेन गगनाभावेऽप्यस्तीति भावः कालि
कसंबंधेन गोत्वादौ घटादिकालोपाधिमात्रवृत्तिघटत्वादिहेतौ नाव्याप्तिः भिन्नकालीनतत्तद्व्यक्तित्वावच्छिन्नाभा
वस्यैव घटादौ प्रतियोगिवैयधिकरण्यसंभवादत उक्तम् अवृत्तिव्याप्तीति पृथिव्यादिचतुर्द्रव्यातिरिक्तेति तु व्या
यः गगनादेः कालावृत्तित्वविरहादेव व्युदासादिति ध्येयम् कर्मात्मकत्वं तु कालस्यापि भिन्नकालीनतत्तद्व्यक्तित्वा
वच्छिन्नाभावप्रतियोग्यनधिकरणत्वप्राप्त्यात्मत्वात् तत्स्पन्दत्वादिहेतौ नाव्याप्तिरत[illegible]रमद्रव्यपदम्
तथाविधकालत्वादावप्युक्तदिशा नाव्याप्तिरतो मात्रपदम् तादृशधर्मस्य महाकालत्वादेस्समवायादिना
व्यापकत्वं संयोगादिव्याप्यवृत्तेस्तु घटमत उक्तं विशेषणतेति कालिकविशेषणतेत्यर्थः व्याप्यवृत्तिप्रमे
यत्वादेः प्रतियोगिवैयधिकरण्याघटितमेव कालिकसंबंधावच्छिन्नव्यापकत्वं संभवतीत्यत उक्तमव्या
प्यवृत्तीति तादृशसाध्यं च घटादिकं द्रव्यत्वादिकं च तद्वतोऽपि कालस्य तदनधिकरणदेशावच्छेदेन का

सि॰ जा॰
२५

योगीतावच्छेदकतापर्य्याप्त्यधिकरणभिन्नत्वस्यैवनिवेशायोगात् एवंचप्रकृतेमहाकालान्यत्वविशिष्टघट
त्वावच्छिन्नाभावस्यप्रतियोगीतायास्साध्यतावच्छेदकाघटकेनमहाकालान्यत्ववैशिष्ट्यरूपसाध्यानिष्ठधर्मे
णावच्छिन्नत्वात्तादृशप्रतियोगीताकाभावमादायनप्रातियोगीव्याधिकरणाभावस्यप्रासिद्धिसंभावनापीतिश्रा
हुः तच्चिंत्यम् प्रमेयवान्वाच्यत्वादित्यादौहेतुसमानाधिकरण तादृशप्रतियोगीताकाभावाप्रसिद्ध्याऽव्या
प्तिप्रसंगात् वक्ष्यतेपातादृशप्रतियोगीतावच्छेदकविशिष्टस्यानाधिकरणत्वंहेतुमतइत्यत्रावच्छेदकवैशि
ष्ट्यमवश्यंसाध्यतावच्छेदकताघटकसंबंधेनैववाच्यम् अन्यथातत्राप्ययःपिण्डस्यापिकालिकसंबंधेन
धूमत्वविशिष्टयद्धूम्न्यादिकंसंयोगेनतदधिकरणतयाधूमवान्वन्हेरित्यादावतिव्याप्त्यापत्तेः इत्यंचपत्र
समवायेनघटत्वविशिष्टस्यकालिकसंबंधेनसाध्यतातत्रमहाकालान्यत्वविशिष्टघटत्वावच्छिन्नाभाव
स्यसाध्यतावच्छेदकताघटकसंबंधेनप्रातियोगीतावच्छेदकावाछिन्नत्वमप्रासिद्धंस्वरूपसमवायाभ्यामेव
तत्रतयात्वावच्छिशिष्टानिरूपितसमवायानभ्युपगमादतत्तादृशाभावमादायनप्रासिद्धिसंभवइतिध्येयम्

राम
२५

साहशसंबंधसामान्येमहाकालान्यत्वविशिष्टघटत्वावछिन्नप्रतियोगिकत्वाविरहात् तादृशघटत्वावछिन्नाभा
वस्यैवानिरुक्तक्रमेण प्रतियोगिव्यधिकरणत्वसंभवेनपूर्वमतस्यैव सम्यक्त्वादिति चेन्न इदानीं महाकालान्यत्ववि
शिष्टो घटः कालोपं महाकालान्यत्वविशिष्टघटवानित्यादिप्रतीत्या महाकालस्यापि तत्तत्कालोपाध्यवछेदेन महा
कालान्यत्वविशिष्टघटवत्वात् अन्यथा प्रतीत्या खंडकाल एव विशिष्टघटवत्वावगाहाने वस्तुमात्रस्यैव
महाकालेसत्वप्रसंगात् इदानीं तदानीमित्यादिप्रतीतिव्यतिरेकेण महाकालाविषयिण्याः प्रतीतेः स्वरसतः कुत्रा
प्यसत्वात् नचैवं खंडकालस्याधिकरणत्वे मानाभावः घटध्वंसविशिष्टः कालः घटवदन्य इत्यादिप्रतीतेः प्रमाणत्वा
नुरोधेनैव खंडकालस्य नव्यानामादितिसिद्धांतानुसारित्वस्यात् परे तु महाकालीयवह्नित्वेन वह्निघटोभयत्वेन वाऽव
छिन्नप्रतियोगिताकस्य धूमसमानाधिकरणाभावस्य प्रतियोगितावछेदकत्वं वह्नित्वे पर्याप्त्यात्र व्याप्तिभियाऽव
श्यंसाध्यतावछेदकाघटकोपस्थाप्यवृत्तिधर्मत्वादनवछिन्नैव हेतुसमानाधिकरणाभावप्रतियोगितानिवेशनी
याप्रत्येकमुभयत्रप्राप्तौ तत्रिसंबंधेनासत्वोद्धर्मस्य तादृशसंबंधेनोभयवृत्तित्वासंभवेन हेतुमान्निष्ठाभावप्रति

ध्याशसंबंधेनेत्यस्य फलमाह सत्त्वादीति विषयतायावृत्यनियामकत्वे सत्त्ववति घटादौ ज्ञानाभावस्य
सहजतः प्रतियोगिवैयधिकरण्यं संभवतीत्यतः संयोगसामान्यस्येति नातिप्रसंग इति ज्ञानवा
न्संयोगवान्सत्त्वादित्यादौ नातिप्रसंग इत्यर्थः सत्तावद्वृत्तित्वसामान्याभावस्य संयोगादावभावा
द् नातिव्याप्तिवारणमेव यात्किंचिदित्यस्यापि प्रयोजनमित्यवधेयम् प्रतियोगितावच्छेदक
विशिष्टेत्यस्य फलमाह म तत्त्वेति स्वयंमनसः स्वड्नाद्भूतत्वम् तत्त्वोभयसाध्यकम् तत्त्वस्य सद्धे
तुतामाशंक्याह गुणकर्मान्यत्वेत्यादि विशिष्टान्त स्वयंमनोगुणयोः क्रमेणान्वितम् इत्यं च वि
शिष्टस्यानतिरिक्तत्वाद्विशिष्टधर्मावच्छिन्नाधेयत्वस्यातिरिक्तत्वमित्यभ्युपेत्य अन्यथोभयत्व
स्यैकाविशिष्टापरत्वरूपत्वेभ तत्त्वम् तत्त्वोभय गुणकर्मान्यत्वाविशिष्टसत्तयोरतिरिक्ततया तयो
स्सहजतया वमनोगुणघटितया प्रतियोगितावच्छेदकविशिष्टेत्यभिधानस्यासांगत्यापत्तेरि
ति ध्येयम् सामान्यपदस्य फलमाह संयोगसामान्याभावेति तथा च संयोगि द्रव्यत्वादित्यादाव

रि
रि
राम

केचित्तु साध्यसाधनभेदेन व्याप्तेर्भिन्नत्वाद्विशिष्टसाध्यकस्थले तु यादृशप्रतियोगितावच्छेदका
वच्छिन्नानधिकरणत्वं हेतुमत इत्यादि दत्तव्यमविशिष्टसाध्यतावच्छेदकस्थले तु यादृशप्रतियोगिता
श्रयानधिकरणत्वं हेतुमत इत्येव लाघवात् ... शुद्धघटस्य साध्यतायां महाकालान्यत्वविशिष्ट
घटस्याभावोपि प्रतियोगिसमानाधिकरणप्रतियोगितात्वप्रतियोगितावच्छेदकधर्मत्वरूपेवला
ने घवान्न तु प्रतियोगित्वरूपानेकधर्मैकाल्पेन गौरवात् तेनैकप्रतियोग्यधिकरणतामादाय संयोगेपतत्वादित्या न
दावव्याप्तिरित्याहुः तन्मते ... कालत्वादित्यादावव्याप्तिवारणायैव वा विशिष्टसाध्य
तावच्छेदकस्थलेपि प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वप्रवेशस्य प्रामाणिकतया गौरवस्याकिं न
चित्करत्वादिति साध्यं ... न वेति वाच्यमिति परेणान्वयः तादृशसंबंधेनेति
साध्यतावच्छेदकसंबंधेनेत्यर्थः ... नीत्यस्य प्रतियोगिवृत्त्यान्वितम् तादृशपदस्य प्रतियोगि
तावच्छेदकसंबंधपरत्वे पुनरग्रे प्रतियोगितासाध्यतावच्छेदकसंबंधा ... वच्छिन्नाग्राह्यता

1444

गा॰ वि
२१

1445

धिकरणयावद्धेत्वधिकरणकोयोयस्तदन्यत्वं प्रतियोगिवैयधिकरण्यं वाच्यमतो गगनाभाव
मादायैव प्रसिद्धेर्न कोपि दोषः नचैवं यत्संबंधेन यद्धर्मावच्छिन्नानाधिकरणं हेत्वधिकरणं त
त्तत्संबंधान्यसाध्यतावच्छेदकसंबंधेन तद्धर्मावच्छिन्नसामानाधिकरण्यमेव लाघवाद्व्या
प्तिरस्तु तथाच घटवान्महाकालत्वादित्यादौ समवायेन घटाद्यभावोपि प्रतियोगिव्यधिक
रणस्संभवतीति वाच्यं घटत्वादिविशिष्टद्रव्यत्ववान्घटत्वादित्यादावव्याप्तेः केनापि संबंधे
न हेतुमतः साध्यतावच्छेदकावच्छिन्नानाधिकरणत्वासंभवादिति प्राहुः तादृशसंबंधसा
मान्यस्य रत्नसमपूर्ववदर्थो बोध्यः क्वचित्साध्यतावच्छेदकसंबंधसामान्ये इत्येव पाठः विव
क्षितत्वादिति अभावांतम् मूलग्रंथे नेत्यादिः तथाच साध्यतावच्छेदकसंबंधसामान्ये यादृश
प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयो
गिकत्वसामान्योभयाभाववत्तादृशप्रतियोगितानवच्छेदकीभूतसाध्यतावच्छेदका

राम
२१

1446

व्याप्तिवारणार्थमेव सामान्यपदमिति भावः विशिष्येति विशिष्टनिरूपिताधेयत्वस्येत्यर्थः तथा
च विशिष्यसत्तावान्जातेरित्यादावव्याप्तिरिति भावः ननु तादृशसंबंधावच्छिन्नयत्वं
यदि केवलाधिकरणानिष्ठाधिकरणतानिरूपकतानवच्छेदकप्रतियोगितावच्छेदककत्वं
सामान्यकालेन वृत्तिवृत्तिमत्तो नोक्तदोषः इत्यत आह समवायेनेति ननु समवायेन
जातेरव्याप्यवृत्तित्वान्न साध्यकेप्रतियोगिवैयधिकरण्यमेव न देयं देयं वा व्याप्यवृत्ति
साध्यकस्थलीयत्वनिरूपकौ साध्यतावच्छेदकेव्याप्यवृत्तितानवच्छेदकत्वविशेषणम्
तो न तत्र व्यलक्षण्यमेवाज्ञातिव्याप्तिरित्यत आह संयोगादीति नत्र विशिष्टनिरूपिताधे
यत्वस्यातिरिक्तत्वोपगमे तत्प्रतियोगितावच्छेदकावच्छिन्नत्वसाध्यतावच्छेदकसंबं
धावच्छिन्नत्वोभयाभाववद्वृत्त्यधिकरणपालिंविच्छाकिवृत्तित्व सामान्यकत्वस्यापिवक्त
णान्नोक्तोपि दोषः इत्यस्य कुरुचरणाः नत्वात्तु साध्यतावच्छेदकसंबंधेन प्रतियोग्यन

लक्षणघटकीभूतो ऽभावः २

व

योगसामान्य एवसमवायनिष्ठस्यपर्वतानुयोगिकत्वस्यवह्नित्वावच्छिन्नप्रतियोगिकत्वस्य च
द्वयोरभावसत्वात्तयैवाव्याप्तिरत आह सामान्योभयेति तादृशोभयाभावस्य स्वरूपसंबंधेनवो
ध्यः तेन समवायादिना तदुभयाभावस्यसंबंधमात्रेसत्वेपि स हेतौनाव्याप्तिः एतद्धटवान्कालां
तरीयतद्धटत्वादित्यादावेतद्धटत्वावच्छिन्नप्रतियोगिकत्वविशिष्टतद्धटानुयोगिकत्वाप्रसि
द्धेरभावांतरमादायातिव्याप्तिः गगनप्रतियोगिकत्वविशिष्टमहाकालानुयोगिकत्वाप्रसि
द्ध्या गगनाभावमादायप्रकृताव्याप्तिवारणासंभवश्चस्यात् अतोनिरुक्तप्रतियोगिप्रतियो
गिकत्वाविशिष्टयत्किंचिद्धेत्वकरणानुयोगिकत्व सामान्याभावं परित्यज्य तदुभयसामान्या
भाव उक्तः नच यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकसंबंधसामान्ये हेत्व
धिकरणीभूतयद्यत्त्वनुयोगिकसाध्यतावच्छेदकसंबंधत्वस्य तथाविधसंबंधसामान्ये
यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वस्यव्यतिरेकस्तादृशप्रतियोगिता पत्र

1448

वच्छिन्नसामानाधिकरण्यं व्याप्तिरिति सर्वः संबंधसामान्य इत्युक्तौ कालिकसंबंधेन धूमप्रतियोगि
कत्वा यः पिंडानुयोगिकत्वोभयसत्त्वाद्धूमवान्वह्नेरित्यादावतिव्याप्तिरतः साधनतावच्छेद
केति समवायिनः संयोगेन साध्यतायां जातिमत्त्वाद्यावतिव्याप्तिः साधनतावच्छेदकीभू
तसमवायात्मकधर्मे समवायावच्छिन्नप्रतियोगिकत्वगुणानुयोगिकत्वोभयसत्त्वेन
साध्याभाववत्वलक्षणघटकत्वात् अतः संबंधपदम् पदधर्मावच्छिन्नसंसर्गताकप्रकृत
साध्यानुमितिः फलं तद्धर्मावच्छिन्नसामान्य इति तु फलितार्थः घटीयसंयोगे पर्वताग्नि
संयोगे वा हेतुमन्महानसानुयोगिकत्ववह्निप्रतियोगिकत्वोभयाभावसत्त्वाद्धूमवा
न्वह्नेरित्यादावव्याप्तिरतः संबंधसामान्यपदं तथा च महानसीयवह्निसंयोग एव तादृ
शोभयाभावद्विरहान्नाव्याप्तिः संयोगसामान्य एव च हेतुमद्योगोलकानुयोगिकत्व
धूमत्वावच्छिन्नप्रतियोगिकत्वोभयाभावसत्त्वाद्धूमवान्वह्नेरित्यादौ नातिव्याप्तिस्सं

1440

रणवृत्तित्वं स्वरूपसंबंधेनैव वाच्यमिति सांप्रतम् आत्मत्वेत्यादिवक्ष्यमाणग्रंथासंगतिप्रसंगात् समवायस्ये
कत्वेपि तदवच्छिन्नद्रव्यत्वाधिकरणतायां निरुक्तोभयाभावसत्त्वेन द्रव्यं जातेरित्यादावतिव्याप्त्यभावा
दिति चेन्न संयोगः पर्वते वन्हेः स्वसंबंधो न तु वन्हौ पर्वतस्येत्यादिप्रतीत्या हि किंचिदनुयोगिक किं
त्वं चित्प्रतियोगिक संबंधमनुभवसिद्धं कुत्रचिदेव संयोगादौ न तु सर्वत्र तत्र स्वरूपसंबंधाविशेषो
तिरिक्तो वेत्यन्यदेतत् तथा च साध्यतावच्छेदकसंबंधसामान्ये निरुक्तप्रतियोगिप्रतियोगिक
संबंधत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकसंबंधत्वोभयाभावस्य विवक्षणे द्रव्यमसं
योगस्यायोगोलकानुयोगिकसंसर्गत्वविरहादेव नातिप्रसंगः तत्र यथायथविशिष्टधीनियाम
कस्यैव तदनुयोगिकसंबंधत्वात् एतेन वन्हिमान्वान्हेरूपादित्यादावतिव्याप्तिः पर्वत
वान्हिसंयोग एव वान्हिप्रतियोगिकत्वहेत्वधिकरणीभूतवन्ह्यनुयोगिकत्वोभयाभाव
विरहेण वान्हिसामान्याभावस्य लक्षणाघटत्वादित्यपास्तं पर्वते वान्हिसंयोगस्य हेतुम

1450

नवच्छेदकत्वमेव साध्यतावच्छेदकस्य कथं नोक्तमिति वाच्यं द्रव्यत्वात्प्रमेयत्वादित्यादौ संयोगेन सा
ध्यतायामतिव्याप्त्यापत्तेः प्रमेयानुयोगिकसंयोगसामान्यस्यैव द्रव्यत्वावच्छिन्नप्रतियोगिकत्वेन
साध्याभावस्य लक्षणघटत्वादिविधेयं एवं कालिकसंबंधसामान्येन हि कालानुयोगिकत्व
सत्त्वेपि गगनप्रतियोगिकत्वविरहाद्गगनाभाव एव घटत्वान्महाकालत्वादित्यादौ प्रति
योगिव्यधिकरणत्वाप्रसिद्धिरिति भावः ननु हेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगि
कत्वं यदि तद्वृत्तित्वं तदा धूमवान्वह्नेरित्यादावतिव्याप्तिः पर्वतप्रतियोगिकस्यापि संयोगस्य का
लिकसंबंधेनालोकोलकवृत्तित्वात् यदि च साध्यतावच्छेदकसंबंधस्य संसर्गतानियामकोप
संबन्धस्तेन हेत्वधिकरणवृत्तित्वमेव तदनुयोगिकत्वं तदा संयोगेन द्रव्यस्य साध्यतायां
द्रव्यजातिमत्त्वादित्यादावतिव्याप्तिः जातौ संयोगस्य समवायेन वृत्तेरप्रसिद्धेः नच साध्यतावच्छेदक
संबंधावच्छिन्नाधिकरणतासामान्ये निरूपकतासम्बन्धेनाभाववत्त्वं विवक्षितं नच हेत्वधिक

विशिष्टदंडत्वावच्छिन्नं यच्चैत्रावृत्तिदंडनिष्ठं प्रतियोगिकत्वं तदाश्रयप्रतियोगिकत्व हेत्वाधिकरणीभू
त चैत्रानुयोगिकत्वोभयाभावस्य संयोगसामान्य एव सत्वान्निरुक्तपदं विनापि नातिव्याप्तिः संभवती
ति तन्मतसाधारण्येनातिव्याप्तिरस्तार्थमुक्तमनेनादिति दंडसामान्यस्य हेतुत्वे एतद्दंडप्रतियोगिकसं
योगसामान्य एव हेत्वाधिकरणयत्किंचित्प्रतियोगिकत्वाभावादेवोभयाभावसत्वादतिव्याप्तिविर
न हस्यापादतो हेतावेतदिति संयोगेसाध्यतायां निरुक्तपदस्य व्यावृत्तिमुक्त्वा समवायेन साध्यतायां
तामाह गुणकर्मान्यत्वेति इदं च समवायस्य नानात्वमभिप्रेत्य तस्यैकत्वे तु तत्र गुणानुयोगिक गु
त्व विशिष्टसत्ताप्रतियोगिकत्वोभयसत्वेनातिव्याप्तितादवस्थ्यात् यद्यपि यादृशप्रतियोगिता
वच्छेदकावच्छिन्ने त्यायुक्तौ वह्निधूमोभयवान्धूमादित्यत्रातिव्याप्तिस्संयोगसामान्य एव व
ह्निधूमोभयत्वावच्छिन्नप्रतियोगिकत्वधूमाधिकरणपर्वतानुयोगिकत्वोभयाभावस
त्वात् न च निरुक्तप्रतियोगितावच्छेदकावच्छिन्नवत्ताप्रमायां सांसर्गिकविषयत्वमेव एम

1452

दण्डि इति चेदपि वह्न्यनुयोगिकसंबंधत्वाविरहे एतत्त्रताहृशोभयाभावसत्वात् इदं त्वत्रावधातव्यं यत्रैकसंयोगव्यक्त्यावत्त्य
दार्थयोः परस्परं विशिष्टधीः प्रमा तत्र तयोरेकात्मीन्नसंयोगेन साध्यतद्दीपवहूपादौ व्यभिचारिण्यतिव्याप्तिस्तु भ
यसंयोगस्यानिरूपकोभयाभावाविरहादिति यत्किंचिदितिपदस्य फलमाह धूमसंयोग इति अन्यथा वह्न्यधिक
रणमहानसानुयोगिकत्व धूमप्रतियोगिकत्वोभयस्यैव धूमसंयोगे सत्वेन धूमाभावस्य प्रतियोगिवैय्य
धिकरण्याभावाद्धूमवान्वह्नेरित्यत्रातिप्रसंगस्यादिति भावः षष्ठ्यंतत्रयं विरहादित्यन्वयि निरूपकप
दस्य फलं तत्फलमाह चैत्रान्यत्वेति निरूपकपदानुक्तौ चैत्रान्यत्वविशिष्टेन दंडवानेतद्दंडादित्य
त्र चैत्रवृत्त्येतद्दंडसंयोग एव चैत्रान्यत्वविशिष्टेन दंडाभावप्रतियोगिप्रतियोगिकत्व हेत्वधिकरणी
भूतचैत्रानुयोगिकत्वोभयाभावविरहात् ताहृशादण्डाभावस्य लक्षणघटकतयाऽतिव्याप्तिस्या
त्तदुपादाने तु चैत्रान्यत्वविशिष्टेन दंडत्वावच्छिन्न प्रतियोगिकत्वस्याभावादेव तत्रोभयाभावसं
भव इति नातिव्याप्तिरिति भावः यद्धि प्रतियोगितासत्या श्रयं मानेव नत्वे केति मतं तदा चैत्रान्यत्व

प्रतियोगिवैयधिकरण्यस्यैवाप्रवेशादित्तिध्येयम् वस्तुतः संबंधस्यैकप्रतियोगिकत्वापरानुयोगिक
त्वनियमेन वह्निधूमोभयत्वावच्छिन्नप्रतियोगिकसंबंधत्वाप्रसिध्यैव तदुभयत्वावच्छिन्नाभा
वस्य लक्षणघटकत्वान्नाव्याप्तिरत एव वह्निधूमोभयवान्वह्नेरित्यादावतिव्याप्तिरप्यग्रेदास्य
ते न च वह्निधूमोभयत्वावच्छिन्नप्रकारित्वादावेव तादृशोभयत्वावच्छिन्नप्रतियोगिकसंबंध
त्वप्रसिद्धिसंभवः प्राचां मते प्रकारित्वादेस्संसर्गत्वाभावात् विशिष्टधीनियामकस्यैव तथात्वा
दितिध्येयम् अत्र ब्रूमः साध्यतावच्छेदकसंबंधावच्छिन्नप्रकृतसाध्याधिकरणतानिरूपितत्व
रूपसंबंधेन यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणतासामान्याभाववत्त्वं हेतुमत्तादृ
शप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षणेनैवासामंजस्यानिरुक्तप्रतियोगि
कत्वेत्यादिखंडशः प्रसिद्धिर्विफला कालोघटवान्महाकालत्वादित्यादौ कालिकसंबंधाव
च्छिन्नघटाधिकरणता[illegible]निरूपितत्वरूपसंबंधेन पटत्वावच्छिन्नाधिकरणत्वस्य

निरुक्तप्रतियोगिप्रयोगिकत्वं वक्तव्यं तच्च पर्वते वह्निधूमयोः प्रत्येकसंयोगस्याप्यस्तीति नाव्याप्तिः अन्य
था पर्वतस्संयोगेन वह्निधूमोभयवानित्यादिप्रमाया दुर्घटत्वापत्तेरिति वाच्यम् तथा सत्यत एवेत्यादि
नादिवक्ष्यमाणाया वह्निधूमोभयवान्वह्नेरित्यत्रातिव्याप्तेरसंभवत्वापत्तेः वह्निधूमोभयवत्ताप्रमा
नियामकसंयोगमात्रस्य हेत्वाधिकरणीभूतायोगोलकत्वानुयोगिकत्वाभावेन वह्निधूमोभयत्वाव
च्छिन्नाभावमादायैवातिव्याप्त्यसंभवात् तथापि साध्यसाधनभेदेन व्याप्तेर्भेदा व्यासज्यवृत्तिधर्मेण
साध्यतायां निरुक्तपदमपहाय यादृशप्रतियोगिताश्रयप्रतियोगिकत्वघटितोभयस्यैव प्रवेशा
न्नोक्तस्थलेऽव्याप्तिः न चैवमुभयत्वेन साध्यतायां व्यभिचारिण्यतिव्याप्तिः तद्दोषस्यात एवेत्यादि
ना वह्निधूमोभयवान्वह्नेरित्यादौ यंप्रकृतैवाग्रे वक्ष्यमाणत्वादिति न चैवमपि घटवान्नित्य
ज्ञानत्वादित्यत्राव्याप्तिः विषयतासंबंधेन गगनीयत्वानित्यज्ञानानुयोगिकत्वोभयसत्त्वेन गगना
भाववत्तायामपि प्राप्तिः धूमसंभवादिति वाच्यम् तादृशसंबंधेन घटादेर्व्याप्यवृत्तितया तत्साध्यके

व्याप्तिस्साधनवान्निष्ठस्य समवायेन संयोगिसामान्याभावस्य प्रतियोगितायां संयोगसमवायोभयावच्छेदकतासत्वा
दतो धर्मसंबंधपदयोरुपादानम् तथा च तदभावप्रतियोगितायां धर्मादिविधया समवायेन संबंधविधया सं
योगेन वावच्छेदकत्वाभावान्नाव्याप्तिरिति भावः अत्र कांचिद्यादृशसंबंधावच्छिन्नत्वेत्यपि दुष्टत्वम्
शब्दैकदेशस्यानुपादेयत्वात् तेन धूमवति तत्तत्संयोगसंबंधेन वह्निसामान्याभावसत्वेपि नाव्याप्तिस्तत्तत्सं
योगावच्छिन्नप्रतियोगितायाः संयोगसामान्यानवच्छिन्नत्वात् संयोगत्वस्य संबंधविधयावच्छेदकताव
च्छेदकत्वेनैव तन्यात्त्वात् एवंपदधर्मावच्छिन्नेत्यत्रापि कांचिद्यादृशधर्मावच्छिन्नत्वेति बोध्यम् तेन दं
डिमान्दंडिसंयोगादित्यादौ तादृशप्रतियोगितायास्तत्तद्दंडत्वावच्छेद्यत्वसंयोगावच्छेद्यत्वोभयवत्वेपिना
व्याप्तिः प्रमेयत्वावच्छेद्यत्वविशिष्टस्वरूपसंबंधावच्छेद्यत्वाप्रसिध्या प्रमेयवान्वाच्यत्वादित्यादावव्या
प्तिरतो विशिष्टाभावमपहाय तादृशोभयाभाव उक्तः न च निरुक्तप्रतियोग्यनधिकरणहेतुमान्निष्ठाभा
वीयपदधर्मावच्छिन्नप्रतियोगितासामान्ये यत्संबंधावच्छिन्नत्वाभावस्तत्संबंधेन तद्धर्मावच्छिन्नं व्याप

प्रतियोगितावच्छेदकसंबंधेन २

1456

मान्याभावस्यैव हेतुमति सत्त्वेन पटत्वाद्यवच्छिन्नाभावस्यैव निरुक्तप्रतियोगिव्यधिकरणस्य सुलभत्वात् एवं याद
शप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकसंबंधसामान्ये साध्यतावच्छेदकसंबंधत्वहेत्वधिकरणेऽभ्रत
यत्किंचिद्वृत्त्यनुयोगिकसंबंधत्वोभयाभाववत्तादृशप्रतियोगिताकत्वं नोक्तमिति चिंतनीयम् कालस्य जगदाधा
रत्वमनुसृत्याह स्वरूपसंबंधेनेति कालिकाविशेषणतयेत्यर्थः गगनादेरवृत्तित्वप्रवादस्तु संयोगसमवायप म
रः तथा चोक्तप्रणाल्यापि गगनाभावो न प्रतियोगिव्यधिकरण इति घटवान्महाकालत्वादित्यादावव्या
प्तिस्तदवस्थैवेति भावः निरुक्तेति प्रतियोगितावच्छेदकसंबंधेन यादृशप्रतियोगिताव च्छेदकावच्छि
न्नासंबंधित्वं हेतुमतस्तादृशप्रतियोगितासामान्य इत्यर्थः तथा च संयोगादिना घटाद्यभावमादायैव घट
वान्महाकालत्वादित्यत्र लक्षणसंगतिः घटाभावप्रतियोगितायां धूमत्वाद्यवच्छिन्नत्वसंयोगसंबंधावच्छि
न्नत्वोभयाभावसत्त्वेन धूमत्वादिना वन्ह्यादिव्यापकत्वापत्तिवारणाय सामान्येति तथा च धूमानिष्ठतादृश
प्रतियोगितायामेव तदुभयसत्त्वाददोषः यत्संबंधेति समवायिनः संयोगेन साध्यतायां घटत्वादिहेताव

न्निरुक्त्याद्दशत्तन्निरुक्तप्रतियोगितासामान्ये यत्संबंधातिरिक्तसंबंधानवच्छिन्नत्वयद्धर्मावच्छिन्न-
त्वोभयाभाववत्तत्संबंधेन तद्धर्मावच्छिन्नस्य व्यापकत्वमिति तु न युक्तम् वृत्त्यनियामकसंबं
धेन साध्यतायां व्यभिचारित्वापत्तेः व्याप्त्यापत्तेः यथा त्वोऽवच्छेदकताघटकतासंबंधेन यादृशप्र
तियोगितावच्छेदकानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितासामान्ये यद्धर्मावच्छि
न्नावच्छेदकताकत्व यत्संबंधावच्छिन्नावच्छेदकताकत्वोभयाभाववत्तेन संबंधेन त
द्धर्मावच्छिन्नव्यापकत्वं विवक्षितम् वृत्त्यनियामकसंबंधस्य प्रतियोगितानवच्छेदकत्वे
पि प्रतियोगितावच्छेदकतावच्छेदकसंबंधत्वं सर्वसंमतमेव चैत्रो न पचतीत्यादौ वृत्त्यनियाम
कानुकूलत्व संबंधेन पाकविशिष्टायाः कृतेरभावस्य चैत्रादावन्वयदर्शनात् व्यभिचारित्वात्तु
साध्यवत्सामान्याभावप्रतियोगितायामेव तादृशोभयाभाववाविरहान्नातिव्याप्तिरिति तु न व्या:
ननु व्याप्यस्य हेतिसाध्यकस्थलेष्णुक्तक्रमेणैव व्यापकत्वं निर्वाच्यं अन्यथा दंडिमानित्यादौ दं

1458

कामित्यर्थस्तु घ भिन्नतावच्छिन्नाभावाप्रवेशेन लाघवादिति वाच्यम् घटवृत्तित्वविशिष्टद्रव्यत्वं वा घटत्वा
दित्यादावव्याप्तिस्तादृशद्रव्यत्वभेदमादायपक्षधर्मत्वे तन्न लक्षणसमन्वये पि हृदपित्वविशिष्टप्रमेयत्ववान्धूमद
धित्वादित्यत्राव्याप्तिः केनापि संबंधेन हेतुमतः साध्यतावच्छेदकावच्छिन्नानाधिकरणत्वासंभवात् तादृशा
विशिष्टद्रव्यत्वस्य द्रव्यत्वत्वापेक्षया गुरुत्वेन प्रतियोगितानवच्छेदकतया तादृशभेदमादायापि लक्षण
संभवात् गुरोः प्रतियोगितावच्छेदकत्वं लौकार्ष्यमिति भावः न चापि दर्थान्तरानुयोगिक समवायादि संबंधेन हे
तुमतः प्रकृतसाध्यानधिकरणत्वे उक्तक्रमेणापि व्यापकत्वं स्तु वचामिति तु विभावनीयम् तेन संबंधेन तिन
चैवं संयोगेनापि हृदयस्य प्राचीनत्वव्यापकत्वापत्तिस्तेन संबंधेन हृदाभावप्रतियोग्यधिकरणप्रसिद्धेरिति वाच्यं
तथात्वे पि तेन संबंधेन हृदयसामानाधिकरण्याप्रसिद्धेर्व्याप्तिलक्षणातिव्याप्तिविरहात् यद्धर्मस्य तद्धर्म
स्य साध्यतावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपकतावच्छेदकत्वेनाविशेषणीयत्वाद्या नवद्
त्वानि यामक संबंधेन साध्यतायामव्याप्तिः तादृशासंबंधस्यापि प्रतियोगितावच्छेदकत्वपदत्वएवेत

धर्मीयेनतौ तद्धर्म
वत्त्वादि संबंधेन

व्याप्तिसंभवना तथापि वन्हिधूमोभयवान्वन्हेरित्यादौ संयोगस्याधित्वावच्छिन्नप्रतियोगीताकत्वविरहेपि समवायस्यैकत्वेन द्रव्यत्वत्वावच्छिन्नत्वगुणानुयोगीकत्वोभयवत्वेन द्रव्यंजातेरित्यादौ नातिव्याप्तिरिति ॥ प्रयोजनाविरहेपि चेति चकारस्तुप्रमादिकः इति प्रांचः वस्तुतः संयोगस्य संबंधमात्रस्याधित्वावच्छिन्न प्रतियोगीकत्वाप्रसिद्धावपीत्यर्थः तथाच संबंधमात्रस्यैकप्रतियोगीकापरप्रतियोगीकत्वानियमेन वन्हिधूमोभयत्वावच्छिन्नप्रतियोगीकसंबंधत्वस्याप्रसिद्ध्याताद्दशप्रतियोगीकत्वस्य लक्षणघटकत्वेन वन्हिधूमोभयवान्वन्हेरित्यादौ नातिव्याप्तिः प्रकारित्वादेस्संबंधत्वेमानाभावादितितु प्रागेव प्रपंचितमस्माभिः केचितु वन्हेरित्यत्र धूमादिति नातिव्याप्तिरित्यनंतरं चाव्याप्तिर्वेतिपाठं कल्पंतो द्रव्यंजातेरित्यादावतिव्याप्तिर्वान्हिधूमोभयवान् धूमादित्यत्रोचाव्याप्तिरेव एवं लक्षणे दोषसंगमयंति ननुस्वरूपसंबंधात्मकप्रतियोगित्वस्याविशिष्टधीजनकत्वरूपसंबंधताघटकानियमघटितत्वादात्माश्रयत्वमतआह प्रतियोगीत्वादीति आदिनावच्छेदकत्वपरीग्रहः नसंब

ड़ित्यादिप्रकारेण व्यापकत्वानुपपत्तेः तथा च प्रमेयमान्यघटादित्वादाव व्याप्तिः प्रमेयत्वाव
च्छिन्नत्वस्याप्रसिद्धेः न च प्रकारित्वादौ तत्प्रसिद्धिः प्रतियोगिता निरूपणावच्छेदकतायाः
प्रकृते निवेशनीयत्वात् अन्यथा प्रकारित्वप्रतियोगित्वसाधारणैकावच्छेदकत्वविरहेण व्य
भिचारिण्यतिव्याप्त्यापत्तेः रत आह समवायेनेति ननु स्वरूपसंबंधेन गगनादेरिति मत्वेपि
प्रकृतसाध्यीयसाध्यतावच्छेदकसंबंधसामान्ये ना दृश्योभयाभावविवक्षयैव सामंजस्ये कु
तं विवक्षांतरेण घटवान्महाकालत्वादित्यत्र घटीयविशेषणतायां घटत्वावच्छिन्नप्रतियोगिक
त्वविरहेण घटाभावस्यैव प्रतियोगिवैय्यधिकरण्यसंभवात् कालः प्रमेयवान्महाकालत्वा
दित्यत्र च कालिकसंबंधेन प्रमेयसामान्यस्य व्याप्यवृत्तितया तत्र प्रतियोगिवैय्यधिकरण
स्यानुपादेयत्वान्निर्दोषत्वादतः पूर्वकल्पे दोषांतरमाह अतएवेति यद्यपि संयोगमात्र
स्यैव द्वित्वावच्छिन्नप्रतियोगित्वविरहाद्घटद्वयोभयत्वावच्छिन्नाभावमादायैव नाति

धत्वेनेति प्रतियोगित्वत्वादिधर्म्मांतरप्रकारेण हेतुमान्निष्ठाभावीयत्वप्रकारेणैव वा तत्रैव शादि
तिभावः संयोगत्वादिनैवेति संबंधविधयेत्यादिः ननु प्रतियोगितात्वमपि स्वरूपसंबंध एवेत्युक्त
दोषतादवस्थ्यम् । किंच वृत्यनियामकसंबंधेन हेतुतास्थले तेन संबंधेन हेतुसंबंधित्वस्यावश्यं
प्रवेशे एवेत्यतस्संबंधत्वेन निवेशोपि नक्षतिरित्याशयेनाह दर्शितंचेति विशेषणत्वविशेष्य
त्वान्यविशिष्टधीविषयत्वस्यैव संबंधत्वादितिभावः भावभिन्नत्वस्याभावस्य प्रवेशे तु घटत्वाभा
ववान्धत्वादावतिव्याप्तिरित्यत आह अभावत्वंचेति इदमिहेत्यादि इदंचात्यंतान्योन्या
भावयोरभावत्वागर्भतामभिप्रेत्य तयोरुक्तधर्मतायां त्वाह तदपिवेति अभावत्वमपि वेत्यर्थः
अपरभावोर्थः अतिरिक्तविषयतापत्तस्यापामतेपि केनचित्स्वीकारात्तस्य दृष्टांतता तत्वादीति
विषयतात्वादीत्यर्थः आदिना प्रकारत्वस्योपग्रहः केचित्तु तत्वं तत्ता आदिनेदंत्वस्योपग्रहः तत्वेदंत
योःपदार्थांतरं विना दुर्वचत्वात्तत्रैव पर्य्यवसानादित्याहुः तत्तेति प्रतियोगिताधिकरणतात्वेत्यर्थः ॥ ॐ ॥